

This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.


+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.

+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`

IndL3117.60



Digitized by Google

Digitized by Google

Digitized by Google

Indl 002.2
(1)

THE

ÁNANDÁŚRAM SANSKRIT SERIES.

NO. 1.

ŚRÍ GAṆAPATI ATHARVAŚÍRSHAM

WITH A BHÁSHYA

BY AN UNKNOWN AUTHOR

EDITED BY

PAṆDIT VÁMAN ŚÁSTRI ISLÁMPURKAR

PUBLISHED BY

MÁHÁDEV CHIMNÁJÍ ÁPTE. B.A., LL.B.,

PLEADER HIGH COURT, AND FELLOW OF THE UNIVERSITY OF BOMBAY.

PRINTED AT THE ÁNANDÁŚRAM PRESS,

POONA.

1888.

(All Rights Reserved.)

Price 6 Annas.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

THE ÁNANDÁS'RAMA

is an institution lately established at Poona for the following objects :—

(1). To form a collection therein of Sanscrit Manuscripts on all possible subjects and to preserve the same.

(2). To print and publish at a press kept there for this special purpose correct editions of these manuscripts in book form.

(3). To give accommodation and food to 5 learned Sanyásis or Pandits with a view that these learned men may assist in the publication of manuscripts by preparing good editions, and may also give lectures on the different systems of philosophy, or the S'astras.

The building for this institution was begun in October 1886, and the part which now contains the collection of manuscripts, and that occupied by the press, and a hall capable of holding 250 people, as also the portion left by me for my residence, having been completed, the institution was formally opened in May last year, and prospectuses in English and some vernacular languages were printed and published. It was my intention at first to have only a second hall capable of holding 500 people and some other buildings for the accommodation of Sanyásis and Pandits added, and to have 2 chawls or ranges of buildings the rental of which should be enough to pay for the feeding of the said Sanyásis and Pandits and for the ordinary repairs of the buildings erected; the estimated total cost of all the buildings intended, and the cost of the plant, and working expenses of the

मूल्य १८ आणकाः ।

Digitized by Google

press for one year, would not, I thought, exceed Rs. 45,000, but as some of my friends and well-wishers have since doubted the propriety of my keeping the collection of manuscripts in the buildings already erected, though they are substantial, for fear of fire, I have now given up the idea of having chawls, and have begun building a set of fire-proof rooms capable of holding more than 50,000 volumes with a hall above them, surrounded by an open space on all sides. This alone will cost me 15,000 Rupees more than the original estimate, and I have to provide for the feeding of Sanyásis and Pandits and repairs of buildings in some other way, but I am prepared to spend whatever is needed. These rooms and the hall will, I hope, be completed by the month of May next year, and thus the manuscripts will have a safe place to put them in. When they are removed there, the rooms now occupied will be used for a library of Sanscrit works already printed and published in India or elsewhere.

I am glad to inform the gentlemen who have assisted me hitherto and those who are interested in this work that I have already been able to collect during the last year not less than 1800 manuscripts; owners of private libraries have also sent me lists of manuscripts in their possession, and most of them are ready and willing to give me a loan of any of them for a time. The number of manuscripts in these lists exceeds 10,000. Some of these manuscripts seem from their names and the names of their authors to be very rare indeed; I am, however, not in a position at present to give more particular information on the subject. However I beg of those who are desirous of having Sanscrit manuscripts preserved to send me as many as they may think proper, or to send me at least lists of manu-

Digitized by Google

scripts in their possession, or of their friends giving name of the work and the subject, the name of the author and commentator, if any, the number of pages and the age of the manuscript where ascertainable, and to promise to lend any of them to me when wanted for a time. Manuscripts sent to me for safe custody will be returned to the owners safely whenever they desire to have them back. Among the several gentlemen who have placed their manuscripts in the Collection at Ánandás'rama, the following cannot but be specially mentioned :—

	In the collection.
Bál S'astri Deva's heirs have placed more than 250 Mss.	Nos. 478-730.
Bhau Sáheb Nagarkar more than 50 Mss., ...	,, 907-964.
Kibe Sáhebs of Indore more than 50 Mss., ...	,, 1194-1251.
Váman Bává Ayáchita Chopadekar, ...	,, 1253-1256, 1317-1331, 1417-1426.
Mártand Dikshit of Badli, ...	,, 1374-1375.
Bápá Sáheb Mairál of Baroda, ...	,, 1376-1415.

Of the rest many have been purchased by myself and some belong to gentlemen who do not wish to have their names published.

The plan of publication adopted is this :—to select for publication mostly unpublished works, or to publish correct and improved editions of works already published from several manuscripts, on different subjects; to obtain as many manuscripts of each work selected for publication as practicable, and then to give out of these what appears to be the most correct reading in the text and all the other readings at foot.

The editing is done by gentlemen who have volunteered to undertake the task or by *pandits* employed at the Ánandás'rama. When any work is edited by any gentle-

Digitized by Google

man voluntarily, his name appears as editor, but when the edition is prepared by the *pandits* in my employ, their names are not given. Several gentlemen have volunteered to be editors as will be seen below, and I hope other gentlemen who have the desire to see our old literature revived, will come forward with their aid. If any gentleman chooses and undertakes to edit a work for the Ánandás'rama Series, I shall try and obtain for him as many Manuscripts of it as I can myself and through friends, and I shall also defray the expenses he may incur for having a copy of it made, for keeping assistants &c. I am willing and ready to publish any unpublished useful or rare work on any subject that any gentleman may choose to edit.

The works printed at the Ánandás'rama press are to be issued when completed, and not in monthly parts, and are to be sold to subscribers at the rate of Rs. 1-8-0 per 200 pages royal octavo, and to non-subscribers at the rate of Rs. 2 inclusive of postage charges. The subscribers are not to pay anything in advance; they have only to send in their names and each work as it is completed, will be sent to them by value payable post without any extra charge. Refusal to receive any work thus sent will be deemed to be a refusal to continue as subscriber, and no work will be sent afterwards at subscriber's rate. Subscribers will have intimation given them a few days beforehand of any work being posted and its price.

It is hoped that the publication will be on an average at the rate of 200 pages per month. The subscribers will at the most have to pay Rs. 18 only during the year.

The press was set up in October last year, and I had hoped to issue the first work in November or December last year, but owing to various causes (resulting in the

Digitized by Google

loss of a pretty large sum of money to me) which it would be now useless to place before the public, the publication has been delayed up to this time, and, notwithstanding this delay, I am constrained to crave the indulgence of the readers as to the nature of these first publications, for I fear I have not been able to give as correct editions as I wished, hoped and strove for. I have every hope, however, that these defects will be remedied in future publications, and I beg of my readers to favour me with any suggestions they may have to offer for the improvement of the work.

I am glad to inform those who are interested in this matter that I have already secured the number of subscribers, which I originally thought was enough to make the work of publication self-supporting, but my experience of the last six months shows that the number already secured is not enough, and that some more subscribers will be needed. I have, however, every hope of obtaining them from the encouraging manner in which my original prospectus was received by those who have already become subscribers, and I hope that those who read these publications, will recommend them to their friends, and to those who wish to see Sanscrit manuscripts preserved, for I believe the only mode of effectually preserving them is by getting them printed and published. I know that those who subcribe for this series will not find all or even any of the works useful to themselves personally, but I appeal to their patriotism. Every Nation in the world is proud of the works of its ancestors, whether they be in the form of monuments, relics or works of intellect, and whether they are still useful or have ceased to be useful long ago. Those nations who have nothing to boast of in the shape of works of their own ancestors

Digitized by Google

lay claim to those of others by way of remote relationship, such as that of their being upon the same continent or by tracing their lineage to some ancestor belonging to that nation: thus the Modern nations of Europe are proud of the works of the ancient Greeks and Romans. I hope that my countrymen will show a decent pride for the works of their owa ancestors, whether they may be useful at the present day or not, but simply mark the progress of Árya-vart in the remotest ages. For myself personally I think it the duty of every Árya to preserve every relic of his ancestor, for I think that the Áryas need not look down before any other nation in the past or even of the present day for certain feats of intellect in some of its highest departments, if they but try to find out and preserve what their ancestors have done.

The following are the works now ready for sale and in course of preparation :—

No. I. The Ganes'a Atharva S'írsha, with Bháshya of an unknown author. Edited by Pandit Váman S'ástri Islámpurkar 0 6 0

No. II. The Rudrádhyáya, with the Bháshyas of Sáyana Mádhaváchárya and Bhatta Bháskar. Edited with the assistance of several Pandits ... 1 6 0

No. III. The Purusha Súkta, with the Bháshya of Sáyana Mádhaváchárya. Edited with the assistance of several Pandits. 0 4 0

No. IV. The Yogaratnákar, by an unknown author. Edited with the assistance of several Pandits. *In the press and will be out by the middle or end of August next.*

No. V. The Ís'avásyopanishad, with a Vártik called its Rahasya by Bramhánanda Sarasvati, and the Bháshya of S'rimat S'ankaráchárya and

Digitized by Google

commentary by S'rimat Ánanda-Dnyán. *These are being prepared by Mahámahopádhyáya Bála S'ástri Ágáse of Ratnágiri.*

No. VI. The Kenopanishad, with two Bháshyas, the Pada Bháshya and Vákya Bháshya by S'rimat S'ankaráchárya, and commentary by S'rimat Ánand-Dnyán. *These are being prepared by Mahámahopádhyáya Bála S'ástri Ágáse of Ratnágiri.*

No. VII. The Kathopanishad, with the Bháshya of S'rimat S'ankaráchárya, and commentary by S'rimat Ánanda-Dnyán. *This is being prepared by Mr. V. K. Rájváde, M. A., Professor of Sanscrit, Sind College.*

No. VIII. The Pras'nopanishad, with the Bháshya and commentary as above. *This is being prepared by Pandit Dinkar S'ástri Jos'i of Nágáv.*

No. IX. The Mandukopanishad, with the Bháshya and commentary as above. *This is being prepared by several Pandits.*

No. X. The Mándukyopanishad, with the Kárikás of S'rimat Goudapadáchárya, with the Bháshya and commentary as above. *This is being prepared by Ráo Sáheb Ábáji Vishnu Káthavate, B. A., Professor of Sanscrit, Arts College, Ahmedabad.*

No. XI. The Taittiríyopanishad, with the Bháshyas of S'rimat Sáyana Mádhaváchárya and of S'rimat S'ankaráchárya and commentary on the latter by S'rimat Ánand-Dnyán. *This is being prepared by Pandit Váman S'ástri Islámpurkar.*

No. XII. The Aitareyopanishad, with the Bháshya and commentary as No. IX. and X. *This is being prepared by several Pandits.*

मूल्य १८ आणकाः ।

Digitized by Google

N.B. I am still in hopes of getting Vártikas or Kárikás on some of the above Upanishads, and if I should get them I shall publish them along with the Bháshya and commentary.

No. XIII. The Rasaratnasamuchchaya, of Wágbhatta. *This is being prepared by Pandit Krishnáji Vináyak Bápat of Wái.*

No. XIV. The Tarkaprakás'a, (S'itikanthi), by S'ridíkshita S'ríkantha. *This is being prepared by Mahámahopádhyáya Bhímácharya, Senior Pandit, Elphinstone College.*

I have been able to obtain several manuscripts of each of these, of various dates and the editions will be prepared by collating them all.

Mahádev Chimnáji Apte, b.a., ll.b.,
Pleader High Court and Fellow of
the Bombay University.

Ánandás'rama, 28th May 1888.

Digitized by Google

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १

श्री गणेशाथर्वशीर्षम्

सभाष्यम् ।



पण्डित वामनशास्त्री इसलामपुरकर इत्येतैः

संशोधितम्

तच्च

महादेव चिमणाजी आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रमसुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८१०

सन १८८८

(अस्य सर्वेऽधिकाराः राजशासनानुसारेण स्वायत्तीकृताः)

मूल्यं ८६ आणकाः ।

Digitized by Google

~~Ind L 3117.2 (1)~~

HARVARD COLLEGE LIBRARY
[illegible] OF
CH[illegible] LANMAN
MARCH 15, 1941

Ind L 3117.60
✓

Digitized by Google

॥ ॐ नमः परमात्मने ॥

भो भोः सहृदयाः आर्यदेशीयप्राचीनविद्यावैभवमुररीकुर्वन्तो महाशयाः विदितमस्तु तत्र भवतां भवताम् । यत्किल पुण्याख्यपत्तने देव्याः सरस्वत्याः विलासस्थानमिव बहुसाहस्रिकधनव्ययेन आनन्दाश्रम इत्याख्यं भवनं निर्मापयता महोदयेन महादेव चिमणाजी आप्टे इति सुगृहीतनामधेयेन— न केवलं भारतवर्षीयाणामेव अपितु अखिलस्य जगतोऽप्यतीवोपकृतम् । तस्य च उद्देशादिकं पूर्वमेव विज्ञापनपत्रद्वारा सर्वान् प्रत्यावेदितम् । बहुना परिश्रमेण संग्रहीतानि संग्रहिष्यन्ते च बहूनि प्राचीनसंस्कृतग्रंथपुस्तकानि । मुद्रायंत्रमपि तत्रैव संस्थापितम् । अप्रसिद्धग्रन्थावल्याः मुद्रणमप्यारब्धम् । क्रमशः प्रचयगमना भविष्यन्ति च बहवो ग्रन्थाः ॥

तत्र तावत् "आनन्दाश्रमग्रन्थावल्याः" प्रारम्भे अस्य महतः कार्यस्य विघ्नविघातोपशमनार्थं गणपतिपूजनमिवेदं गणेशाथर्वशीर्षं सभाष्यं निवेशितम् । अस्य ग्रन्थस्य संशोधनं पुण्यपत्तनस्थैर्बहुभिर्विद्वद्वरैरारम्य निःसारमिदं भाष्यमिति कृत्वोपेक्षितम् । तदनन्तरं मत्सुहृद्वरेणानन्दाश्रमाधिपतिनाऽभ्यर्थितेन कार्यान्तरव्यापृतत्वादलब्धबहुलावकाशेनापि मया श्लाघनीयस्यास्य लोकोपकारिकार्यस्य यथाशक्ति किमपि साहाय्यं कर्तव्यमिति कृत्वास्य ग्रन्थस्य संशोधनं कथंकथमपि आरब्धम् । तत्र च पञ्च आदर्शपुस्तकान्युपलब्धानि । तानि यथा—

क. संज्ञितं. शालिवाहनशके १७३८ धातृनामसंवत्सरे मार्गबहुल ५ म्यां लिखितं महादेव चिमणाजी आप्टे इत्येतैः संगृहीतमेकम् ।

ख. संज्ञितं. इंदूरनिवासिभिः भाऊसाहेब किबे इत्येतैः प्रेषितम् । नास्योपरि शकादिकं किञ्चित् ।

ग. संज्ञितं. उम्बरगांवनिवासिभिः विनायक भिकाजी पिम्पूटकर इत्यभिधैः प्रेषितम् । संवत् १९३८ वृषनाम संवत्सरे कार्तीक शु० द्वितीयायां लिखितम् ।

घ. संज्ञितं. वटोदरनिवासिभिः बाप्पासाहेब मैराळ इत्येतैः प्रेषितं शकहीनं च ।

ङ. संज्ञितं. चिंचवडनिवासिनां चिंतामणभट्ट कोशे इत्येतेषामेकं शके १७९९ ईश्वरनामसंवत्सरे चैत्र शु० प्रतिपदि लिखितम् ।

एतत्पुस्तकपञ्चकमाकलय्य यथामति यथाविज्ञानं संशोधितं मयेदं गणेशाथर्वशीर्षभाष्यम् । सर्वेष्वप्यादर्शपुस्तकेषु भाष्यकर्तुर्नामादिकं कुत्रापि नोपलब्धम् । अनेनैव भाष्यकृता सर्वसारनिर्णयाख्योऽन्यो ग्रन्थः कृत इति ज्ञायते [अस्यैव

Digitized by Google

२१ पृष्ठे २६ पङ्क्तौ द्रष्टव्यमेतत्]। सोऽस्माभिर्न दृष्टः। अत्र बहूनि प्रमादस्खलानीवोपलब्धानि । भाष्यमिदं नातिसमीचीनं तथाप्यन्यस्य समीचीनस्योपलब्ध्यभावात्प्राचीनत्वाच्चेदमेव संगृहीतम्। अनतिसमीचीनोप्ययं—

प्रेम्णा सद्भिर्ग्रन्थः सेव्यः शब्दार्थतः सदोषोऽपि ।
संशोध्य वापि हरिणा सुदाममुनिसतुषपृथुकमुष्टिरिव ॥ १ ॥

मुद्रणकर्मणि नियुक्तानामनवधानेन च यदत्र स्खलितं तत् " गच्छतः स्खलनं न दोषाय " इति न्यायेन क्षन्तु महर्हति सुधिय इति साञ्जलिबन्धं प्रार्थयते—

भवदीयः

वामनशास्त्रिशर्मा ।

Digitized by Google

॥ श्रीः ॥

अथ गणेशाथर्वशीर्षम्

सभाष्यम्

प्रणम्य तं गणेशानं सिद्धि-बुद्धिप्रदं परम् ।
अथर्वशीर्षभाष्यं वै कुर्वे वेदान्तबृंहितम् ॥ १ ॥

अथाथर्वणो ब्रह्मणां ब्रह्मणश्च स्वस्वोपाधिविरहात्*मैक्यज्ञानप्राप्त्यर्थं गणेशाथर्वशीर्षमवदत् । सर्ववेदोक्तकर्मोपासनज्ञाननिष्ठनिर्विघ्नसिद्धिबुद्धिप्रकाशकतत्तत्फलवेदान्तवेद्यैक्ययोगप्रदतत्त्वमस्यात्मकदेहत्वात् । तत्त्वमसिप्रतिपाद्यब्रह्मबाह्यान्तरकर्मज्ञानप्राप्त्यर्थोपास्योपासकत्वाभावाच्च । ननु तत्त्वमस्यादिमहावाक्यार्थानुभवयुक्ता योगिनो भवन्ति, किं गणेशोपासनेन । सावयवब्रह्मैकत्वाभावात् इति चेन्न । महावाक्यप्रतिपाद्यब्रह्मसदाभेदात्मकत्वादध्यारोपापवादसिध्दयर्थं गणेशोपासनं मुख्यं, बाह्यान्तरानात्मभावनाशकत्वाच्च । ननु ब्रह्मैक्यभावचिन्तनादध्दयारोपापवादसिद्धिर्भविष्यति अभेदभावेनायाभेदनाशकत्वादिति चेन्न । ब्रह्मण ऐक्यभावचिन्तनाभावात् "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" [तै० उ० अ० २ अ० ४ कं० २८] इति श्रुतेः गणेशचिन्तनस्य सम्भवाच्च । "ब्रह्मणां ब्रह्मणस्पते" इति श्रुतिसार्थकत्वात् । अस्यायमर्थः । ब्रह्मणामन्नप्राणादिप्रणवपर्यन्तानां शिवविष्ण्वादिदेवात्मकानां च पतिर्गणेशः । सोपाधित्वेन नानात्मकत्वात्सदासमानत्वाभावाद्ब्रह्मणामिति बहुवचनम् । अन्यच्च । ब्रह्मणो निरुपाधिसर्वकारणात्मनः पतिः । अनपवादनिर्विकल्पनात्मकत्वात् । एकवचनं जीवात्मपरमात्मनोरैक्यभावात् । तयोः पतिस्त-

---

* अत्र मूले चतुर्ष्वप्यादर्शपुस्तकेषु 'स्वस्वोपाधिविहारात्मैक्य०' इति वर्तते तदसङ्गतमिव प्रतिभाति । "उपाधिना क्रियते भेदरूपः" इत्यादिश्रुतिभ्यः ब्रह्मणां जीवानां ब्रह्मणश्च उपाधिकल्पित एव भेदः वस्तुतस्त्वभेद एव । अतः जीव-ब्रह्मणोः स्वस्वोपाधिभूतयोः विद्याविद्ययोः विरहेण भागत्यागलक्षणया पृथक्करणेन यदात्मैक्यज्ञानं तस्य प्राप्त्यर्थमथर्वणो गणेशाथर्वशीर्षमवददित्येव साधीयः । स्वस्वोपाधिविहारेणात्मैक्यज्ञानप्राप्तेरसम्भवात् तत्र प्रमाणाभावाच्चेति सुधियो विदाङ्कुर्वन्तु ।

---

१ ख० पुस्तके 'कर्मोपासननिष्ठ०' इति पाठः ।
२ ख० पुस्तके वेद्यैक० इति पाठः ।
३ ख० पुस्तके 'सदात्मकत्वात्' इति पाठः ।
४ क०ख०पुस्तकयोः'०वनाशकत्वाच्चेन्न'इति पाठः।
५ ख० पुस्तके 'भेदात्मकत्वात्' इति पाठः ।
६ ख० पुस्तके '०क्यभावात्' इति पाठः ।

Digitized by Google

त्त्वमस्यात्मकत्वात्। ननु ब्रह्मणःचिन्तनं सम्भवति, "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[बृ० ४-४-५] इति श्रुतेरिति चेत्। सत्यम्। तथापि चित्तवृत्तिनिरोधभावना सुदुर्लभा। सातत्येन ध्यातृ-ध्यान-ध्येयाभावात् चित्तस्य चञ्चलत्वात्तत्स्थैर्याभावाच्च। वस्तुतस्तु गणेशचिन्तनं सर्वसिद्धिप्रदम्। तत्त्वमस्यात्मकत्वात्सुलभार्थतदर्थवशीर्षतात्पर्यात्। ननु नानाकामप्रदं गणेशचिन्तनं, सिद्धिप्रदत्वादिति चेन्न। ब्रह्मभावसिद्धिप्रदत्वात्। "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति "सिद्धानां कपिलो मुनिः" इति। भविष्ये व्यासेन शुकस्योपदेशः कृतः "प्राप्स्यसे सिद्धिमुत्तमाम्" इत्यादिनानास्मृतिभ्यः। ननु शिवचिन्तनं सर्वसिद्धिप्रदम्। "ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः" इति श्रुतेरिति चेन्न। ईशानस्य विशेष्यत्वात् ब्रह्माधिपत्यादिपदातदङ्गविशेषणत्वात्। ननु सर्वश्रेष्ठेशानं-ब्रह्माधिपत्यादिपदानां विशेषणत्वमेवेति चेन्न। ब्रह्मणः परश्रेष्ठाभावात् सर्वश्रुति-स्मृतिविरोधापत्तेश्च। "ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा" इत्यस्यायमर्थः। तामसस्योङ्कारात्मकस्य विश्वेश्वरादिद्वादशशिवावताराणामेकादशरुद्राणां कालभैरवादिशिवावताराणां च स्तवनं ब्रह्मात्मकतया कृतम्, अंशांशिनोरैक्यप्रतिपादनत्वात्। तेषां शिवावतारब्रह्मणामधिपतिरीशानः, तत्तद्रूपधारकत्वात्। अन्यच्च। सर्वावतारसत्तायाःपतिरीशानो ब्रह्मणोऽधिपतिः। सत्तासदैकजातिमत्वादेकवचनम्। अन्यच्च। ब्रह्मा नानावतारसत्तास्रष्टेशानः, विशेष्यात्मकत्वात्। ननु गणेशोऽपि तादृश एव, विशेष्यात्मकत्वादिति चेन्न। ब्रह्मणस्पतिविशेष्यत्वाद्गणपत्यादिपदविशेषणत्वाद्ब्रह्मैक्यभावप्रदब्रह्मणस्पत्याख्याया मुख्यत्वाच्च। ननु ब्रह्मणस्पतेरपि ब्रह्मोपासना मुख्या, पतिभावनाशकत्वात् महावाक्यस्य ब्रह्मप्रतिपादकत्वाच्च। "प्रज्ञानं ब्रह्मेति, सत्यं ज्ञानमनन्तं ब्रह्मेति, सर्वं खल्विदं ब्रह्मेति, अहं ब्रह्मास्मीति, एकमेवाद्वितीयं ब्रह्मेति, अयमात्मा ब्रह्म" इत्यादिश्रुतिभ्यश्चेति चेन्न। स्वस्वोपाधियुक्तब्रह्मणां सर्वकारणब्रह्मणश्चोपदेशार्थं पतिपदं, तदाराधनोपाधिकारणभावनाशकत्वात्। पतिपदं न वास्तवम्। उपाधिहीनब्रह्मणां कारणहीनब्रह्मणश्च पतित्वाभावः,तदैक्यत्वात्।"पतित्वं कथना-

---

* अत्र सर्वेष्वादर्शपुस्तकेषु ब्रह्मभूतसिद्धि० इति प्रामादिक मिव प्रतिभाति। 'ब्रह्मभूयसिद्धि' रथवा 'ब्रह्मभावसिद्धि०' इत्येव सुवचम्।?

---

१ ख० पुस्तके 'ोत्वात् वाक्यव्यक्तादिसृष्टिप्रपञ्चेषु सुलभार्थ०' इत्यधिकम्।

२ क० ख० 'विशेष्येशानत्वात्त०' इति पाठः।

३ ख० ग० पुस्तकयोः ०नो ब्रह्मा० पाठः।

४ ख० 'विशेषा०' इति पाठः।

Digitized by Google

त्मकम्"इति स्मृतेः। ननु बाह्याज्ञाननाशको गणेशः। अवयवयुक्तत्वादिति चेन्न । आन्तराज्ञाननाशको ऽपि, बुद्धिपतित्वात् । "अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः"इति "सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद निहितं गुहायाम्" [तै०व० २अ०१] इत्यादिश्रुतिभ्यः,"यो बुद्धेः परतस्तु स" इति, "आत्मा बुद्धेः परो मतः"इत्यादिस्मृतिभ्यश्च । ननु शिव-विष्णु-सूर्य-शक्तिचिन्तनं ब्रह्मभावप्रदं, तत्तदथर्वशीर्षे तत्तद्ब्रह्मप्रतिपादकत्वात् इति चेन्न । अथ्याकृतप्रणवानन्दाद्युपासनवदारण्यकोक्तब्रह्मप्रतिपादकत्वात् गणेशाथर्वशीर्षे तत्त्वमस्यात्मकमहावाक्यप्रतिपाद्यब्रह्मैक्यात्, महावाक्यात्परं वेदान्ते ब्रह्मप्रतिपादनाभावाच्च । न चैवं—गजवदनाद्यवयवयुक्तगणेशस्य भिन्नतावच्छेदकावच्छेद्यतया ब्रह्मणि महावाक्यप्रतिपाद्य ऐक्याभावादतिव्याप्तिः। सदा कार्यकारणैक्यब्रह्मणः सावयव-गणेशेऽवच्छेदकावच्छेद्यहीनत्वादव्याप्तिश्च—इति वाच्यम् । त्वं तदसिपदस्वस्वोपाधिविहारसामर्थ्यप्रद-संपूर्णतत्त्वमस्यात्मकदेहधृद्गणेशोपासनप्रयोजनत्वात्, अनन्तकल्पविहाराशाश्वतसन्तोषस्वस्वोपाधिनाशकगणेशोपासनप्रयोजनत्वात्,उपास्योपासकोपासनायामहदज्ञाननाशकत्वात्,ब्रह्मण्युपास्यत्वाभावात्,सामान्यानुमानतया गणेश-ब्रह्मणोरैक्यप्रतिपादकत्वाच्च।न चैवं—[2]ब्रह्मोपासनं वेदान्तविरुद्धम् ब्रह्मभूतस्य उपास्योपास[3]कत्वाभावात्।"तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते"इति श्रुतेः—इति वाच्यम् । गणेशोपासनाया अज्ञाननाशं कृत्वा ततो योगिनः लोकसंग्रहार्थं गाणेशत्वात्,देहरक्षणार्थंभोजनाच्छादनवत्कायिकवाचिक-मानसिक-सांसर्गिकगाणेशधर्मत्वाच्चेति दिक् । अथ प्रकृतमनुसरामः।

ॐ नमस्ते गणपतये ।

अथर्वणः स्वानुभवज्ञानं जगदुद्धारार्थमवदत् । सुलभकर्मोपासन-ज्ञानयोगप्राप्तिकारकत्वात् । ॐ इति मङ्गलाचरणार्थम्* । ग्रन्थादौ मङ्गलाचरणस्य शिष्टसम्प्रदायप्रवर्तकत्वात् । वेदाद्यो ओङ्कारः सर्वमङ्गलमयो, वेदोक्तनानाकर्मोपा-

* अत्र सर्वेष्वादर्शपुस्तकेषु ओङ्कारस्य मङ्गलाचरणार्थत्वमुक्तं तन्न युक्तमिति प्रतीयते । यद्यपि मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते " इत्यादि वचनैः निष्प्रत्यूहपरिसमाप्तये ग्रन्थादौ मङ्गलाचरणस्य शिष्टसम्प्रदायप्रवर्तकत्वं स्पष्टम् तथापि मङ्गलाचरणस्य विघ्नविधातनिवारणार्थमेवानुष्ठेयत्वात् अपौरुषेयेषु स्वत एव मङ्गलरूपेषु वेदेषु विघ्नविधातशङ्काया असम्भवात् अत्र ओङ्कारस्य मङ्गलाचरणार्थत्वं न युक्तम् । पौरुषेयेष्वेव प्रत्यूहशङ्का । अतस्तत्रैव मङ्गलाचरणस्य शिष्टसम्प्रदायः । न हि केषुचिद्वैदिकग्रन्थेषु मङ्गलाचरण मनुष्ठितं दृष्टम् । किञ्च । सर्वकर्मसु आदौ

१ ग० घ० पुस्तकयोः 'स्यायभा' इति पा०।
२ ग० घ० पुस्त० इति । उपासनं.
३ ग० घ० पुस्तकयोः० इति पाठः ।
का भावात्.

Digitized by Google

सनज्ञानयोगफलप्राप्तिकारकत्वाच्च । " यो वेदादौ स्वरः प्रोक्तः " इति श्रुतेः । स्वर इत्योङ्कारारूया छान्दोग्ये† । " तस्यादिस्मरणावश्यकत्वात् " इति । न चैवं सर्वश्रुति-स्मृति-पुराणेतिहासप्रोक्तं सर्वारम्भेष्वादौ गणेशपूजनं निरर्थकम् अत्रोङ्कारस्मरणा दिति वाच्यम् । सगुणगणेशस्योङ्कारमयत्वात् । तदेव कथ्यते मौद्गले । गणेशस्यादिपूजनं चतुर्विधम्,चतुर्मूर्तिधारकत्वात् । तत्र ब्रह्मणश्चतुर्भ्यो मुखेभ्यः पुराणं निःसृतं अष्टलक्षपरिमितम् । ततो द्वापरान्ते व्यासेनाष्टादशपुराणान्युपपुराणानि च कृतानि । कलिमन्दमतिजनबोधप्रवेशार्थम् । तत्र अष्टादशपुराणेष्वाद्यं ब्राह्मं निर्गुणगणेशमाहात्म्ययुक्तं, बुद्धि-परात्मप्रतिपादकत्वात् । अन्त्यं ब्रह्माण्डाख्यं सगुणगणेशमाहात्म्ययुक्तं, प्रणवप्रतिपादकत्वात् । तद्वदुपपुराणेष्वाद्यं गाणेशम् सगुणनिर्गुणैक्यभावयुक्तं, गजवदनाद्यवयवमूर्तिधरमाहात्म्ययुक्तत्वात् । अन्त्यं मौद्गलं योगमयं गणेशमाहात्म्ययुक्तम्, सर्वपुराणोपनिषद्ब्रह्मैक्यभावप्रदत्वात् । पुराणोपपुराणेषु मध्यस्थषोडश पुराणानि शिव-विष्ण्वादिगणेशांशमाहात्म्ययुक्तानि । मध्ये नानांशविहारप्रतिपादकत्वात् । तत्र सर्ववेदाद्युक्तसृष्ट्यारम्भे गणेशस्मरणं चतुर्विधम् । आद्यन्तपुराणोपपुराणेषु गणेशमाहात्म्यप्रकाशकत्वात् । तत्र केचिदादौ बुद्धिस्थगणेशस्मरणं कृत्वा सत्कर्माणि कुर्वन्ति । तद्वत्प्रणवस्मरणं केचित्, केचिन्मूर्तिधरस्मरणं, केचिद्योगमयस्मरणं च । तत्तत्सिद्धिप्रदत्वात् । तत्र कथ्यते ।

" अष्टादशपुराणेषु दशभिर्गीयते शिवः ।
चतुर्भिर्गीयते विष्णुर्द्वाभ्यां शक्तिश्च विघ्नपः ॥ "

इति स्मृतेः । ननु उपपुराणेषु महावाक्यप्रतिपाद्यगणेशवर्णनमयुक्तम् । उपवेदवत्कनिष्ठसंज्ञामयत्वादिति चेन्न । तत्रोपपदस्यश्रेष्ठत्वप्रतिपादकत्वात् । इन्द्रो-

---

निर्विघ्नतासिद्ध्यर्थं स्मरणीयस्य गणेशस्याप्यथर्वशीर्षारम्भे प्रत्यूहनिवारणार्थं मङ्गलाचरणस्यावश्यकत्वे तस्यापि निर्विघ्नतासिद्ध्यर्थमन्यत् तस्याप्यन्यदित्यनवस्था केन वार्यते । तस्मात्सुष्टूक्तमत्र ओङ्कारस्य मङ्गलार्थत्वं नेति । अथ तस्य कोऽर्थ इति चेत् शृणु ।

" ओमित्येतद्ब्रह्म " इति श्रुतेः " ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत " इति स्मृतेश्च भगवता भाष्यकृता ओमित्येदक्षरं परमात्मनोऽभिधानं नेदिष्टम् । तस्मिन् हि प्रयुज्यमाने स प्रसीदति "प्रियनामग्रहण इव लोकः" इत्युक्तत्वात्" तस्य वाचकः प्रणवः"इति श्रुतेश्च ओङ्कारस्य ब्रह्मणः वाचकत्वं सिद्धमतो ओङ्कारशब्दवाच्यं ब्रह्मैव गणेश इति वक्तुं प्रथममोङ्कारस्यापदेश इत्येव व्याख्यानं युक्तम् । नचैवं सति ओङ्कारस्य आरम्भार्थकत्वं कुतो न स्वीक्रियत? इति वाच्यम् । "अनन्ता वै वेदा " इत्यादिश्रुतिविरोधात् । अनाद्यनन्तस्य वेदस्यारम्भादिकल्पनाया असम्भवादित्यलं पल्लवितेन।

† छान्दोग्योपनिषदि तृतीयाध्यायस्य तृतीयखण्डे " स्वर इतीममाचक्षते " इत्यादौ द्रष्टव्यमेतत् ।

---

१ ख० ग० घ० सदारम्भेषु.

Digitized by Google

पेन्द्रनिदर्शनत्वादुपदेशप्रकरणादौ कनिष्ठान्तश्रेष्ठत्वप्रतिपादकत्वात् । पूर्वमीमांसोत्तरमीमांसावदरण्यवद्ग्रहणत्वाच्च । तथाच गणेशगीतायाम् ।

" अष्टादशपुराणोक्तममृतं प्राशितं मया ।
ततोऽतिरसवत्पातुमिच्छाम्यमृतमुत्तमम् ॥ "

इत्यादिस्मृतिभ्यः ।

देवादिगणानां महत्तत्त्वादितत्वगणानां निर्गुण-सगुणब्रह्मगणानां च पतिर्गणपतिः । सर्वादिपूज्यसर्वपूज्यत्वात् । गण्-समूहे इति धात्वर्थात् । नचैवं-अशुभकर्मारम्भे गणेशपूजनं न दृष्टम् । प्राणप्रयाणसमय-पितृयज्ञादावप्रसिद्धत्वात्-इति वाच्यम् । गयास्थगणेशपादस्य पितृमुक्तिप्रदत्वात् । वेदोक्तसत्कर्मारम्भे पितृयज्ञसिद्धिप्रदत्वात् वेदोक्तपितृयज्ञारम्भे गणेशपूजननिषेधाभावात् तद्वत्प्राणप्रयाणसमये कथितत्वाच्च । " ज्येष्ठराजम् " इति श्रुतेः पितृणामपि ज्येष्ठत्वात् । तथा च गाणेशे त्रिपुरवधकाले शिववाक्यम् ।

" शैवैस्त्वदीयैरुत वैष्णवैश्च शाक्तैश्च सौरैरपि सर्वकार्ये ।
शुभाशुभे लौकिकवैदिके च त्वमर्चनीयः प्रथमं प्रयत्नात् ॥"

इति । गणेशगीतायाम् ।

" यः स्मृत्वा त्यजति प्राणमन्ते मां श्रद्धयान्वितः ।
स यात्यपुनरावृत्तिं प्रसादान्मम भूभुज "

" ॐ गणेशो वै ब्रह्म, तद्विद्याद्यदिदं किंच, सर्वं भूतं भव्यं जायमानं च तत्सर्वमित्याचक्षते । अस्मान्नातः परं किंचित्, यो वेद स वेद ब्रह्म, ब्रह्मैवाप्नोति तत्सर्वमित्याचक्षते " ब्रह्म-विष्ण्वादिगणानामीशभूतमित्याह " तद्गणेश " इति तत्परमित्याह " यमेतेनाप्नुवन्ति " इति गणेशतापिनिश्रुतेः । मौद्गले ।

" गणशब्दः समूहस्य वाचकः परिकीर्तितः ।
समूहा योगरूपाश्च बाह्यान्तरैक्यभावतः ॥
अन्नानां सकलानां वै समूहेऽन्नमयं परम् ।
कथितं ब्रह्म वेदे तदेवं नानागणाः स्मृताः ॥
तेषां स्वामी गणेशानस्तं ज्ञात्वा योगिनः पुरा ।
शान्तिं प्राप्ता विशेषेण योगशान्तिमयं परम् ॥ " इति ।

अन्यच्च । " कथितं सामवेदे यच्छृणु वेदरहस्यकम् ।
येन त्वं शान्तिसंयुक्तो भविष्यसि न संशयः ॥
मनोवाणीमयं सर्वं दृश्यादृश्यस्वरूपकम् ।

Digitized by Google

गकारात्मकमेवं तत्तत्र ब्रह्म गकारकः ॥
मनोवाणीविहीनं च संयोगायोगसंस्थितम् ।
णकारात्मकरूपं तण्णकारस्तत्र संस्थितः ॥
विविधानि गकाराच्च प्रसूतानि महामते ।
ब्रह्माणि तानि कथ्यन्ते तत्त्वरूपाणि योगिभिः ॥
णकाराच्च प्रसूतानि ब्रह्माणि तानि योगिभिः ।
निरोधात्मकरूपाणि कथितानि समन्ततः ॥
गकारश्च णकारश्च नाम्नि गणपतेः स्थितौ ।
तदा जानीहि भो योगिन् ब्रह्माकारौ श्रुतेर्मुखात् ॥
तयोः स्वामी गणेशश्च योगरूपेण संस्थितः ।
तं भजस्व विधानेन शान्तिमार्गेण पुत्रक ॥ ”

ते तुभ्यम् नमः । तत्त्वमस्यात्मकब्रह्मनमस्कारसमत्वात् ब्रह्मनमस्कारासम्भवाच्चेति नाममन्त्रोऽयमादौ वर्णितः । सर्वजनोद्धारसुलभत्वात् ॥

ननु गणेशनमनेन जनस्य कृतकृत्यता कथं? सावयवत्वात् । तदर्थं महावाक्यप्रविपाद्यतामाह–

त्वमेव प्रत्यक्षं तत्त्वमसि ।

त्वमिति । त्वमेवेति नान्यः निश्चयार्थत्वादेवकारः । प्रत्यक्षमिति । ब्रह्म दृष्टिगोचरम् । नर-गजभेदाकृतिमयत्वात्तेन महान् हर्षः साक्षाद्ब्रह्मदर्शनाभावात् । तत्त्वमसीति । जगत्कारणं तत्पदसंज्ञम् निर्विकल्पकत्वात् । “ सन्मूलमन्विच्छ सन्मूलाःसौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः [छां० उ० प्र० ६ । ६]” इति श्रुतेः । “ भूमानं भगवो विजिज्ञास इति । यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा” [छां० प्र० ७ खं० २४] इति । “? ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्याद्ब्रह्म दक्षिणतश्चोत्तरेणेति । स यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव” [बृ०६-५-१३] इति श्रुतिभ्यः । “ सत्यं ज्ञानमनन्तमानन्दं ब्रह्म ।” सत्यमविनाशि नाम-देश-काल-वस्तुनिमित्तेषु विनश्यत्सु यन्न विनश्यति तदविनाशिसत्यमित्युच्यते । ज्ञानमित्युत्पत्तिविनाशरहितम् । चैतन्यं ज्ञानमित्यभिधीयते । अनन्तं नाम मृद्विकारेषु मृदिव सुवर्णविकारेषु सुवर्णमिव, तन्तुकार्येषु तन्तुरिवाव्यक्तादिसृष्टिप्रपञ्चेषु सर्वव्यापकं चैतन्यं अनन्तमित्युच्यते । आ-

Digitized by Google

नन्दो नाम सुखचैतन्यस्वरूपाऽपरिमितानन्दसमुद्रे अविशिष्टसुखरूपश्च आनन्द इत्युच्यते । एतद्वस्तुचतुष्टयं यस्य स्वरूपलक्षणं देश-काल-वस्तु-निमित्तेष्वव्यभिचारि स तत्पदार्थः " परमात्मा परं ब्रह्मेत्युच्यत " इति सारोपनिषच्छ्रुतेः जगन्मयं त्वंपदसंज्ञं नानाभेदप्रकाशकत्वात् । " ॐमित्येतदक्षरमुद्गीथमुपासीत । ॐमित्युद्गायति तस्योपव्याख्यानं एषां भूतानां पृथिवी रसः पृथिव्या आपोरसः अपामोषधयो रसः ओषधीनां पुरुषो रसः पुरुषस्य वाक् रसः वाच ऋक् ऋचः साम रसः तस्योद्गीथोरसः सस एष रसानां रसतमः परमः पराध्दर्योऽष्टमो यदुद्गीथः३ । कतमा कतमा ऋक् कतमत् कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ४ । वागेव ऋक् । प्राणः साम । ॐमित्येतदक्षरमुद्गीथः । तद्वा एतन्मिथुनं ओमिति । यद्वाक् च प्राणश्चर्क् च साम च तदेतान्मिथुनमोमित्येदस्मिन्नक्षरं संसृज्यते । यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् । ६ । [छा०प्र० २ खं० १] यथा लोके मिथुनौ यदा समागच्छतस्तदापयतः कामं तथा तदुपासकस्तद्धर्मो भवति । आपयिता ह्वै कामानां तं यथायथोपासते तदेव भवतीति । "त्रयं वा इदं नामरूपं कर्म" बृ० अ० ३ ब्रा० ६ कं० १] " तदेतदमृतं सत्येन छन्नं प्राणो वा अमृतं नाम रूपे सत्यं ताभ्यामयं प्राणश्छन्नः [बृ० अ० २ ब्रा० ६ कं ३] । य यथोर्णनाभिस्तन्तुनोच्चरेत् स यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एव आत्मानो व्युच्चरन्ति । तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्" [बृ० अ० ४ ब्रा० १ कं० २०] । अथ यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पमिति" । मनआदिश्च प्राणादिश्च सत्वादिश्च इच्छादिश्च पुण्यादिश्चैते पञ्च वर्गा इत्येषां पञ्चानां वर्गाणां धर्मीभूतात्मज्ञानादृते न विनश्यत्यात्मसन्निधौ नित्यत्वेन प्रतीयमान आत्मोपाधिर्यस्तल्लिङ्गशरीरं हृद्ग्रन्थिरित्युच्यते । तत्र यत्प्रकाशते चैतन्यं स क्षेत्रज्ञ इत्युच्यते । ज्ञातृज्ञान-ज्ञेयानामाविर्भाव-तिरोभावज्ञाता स्वयमेवमाविर्भावतिरोभावहीनः स्वयं ज्योतिः स साक्षीत्युच्यते । ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिष्वविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते । कूटस्थाद्युपहितभेदानां स्वरूपलाभहेतुभूत्वा मणिगणे सूत्रमिव सर्वक्षेत्रेष्वनुस्यूतत्वेन यदा प्रकाशत आत्मा तदाऽन्तर्यामीत्युच्यते । सर्वोपाधिविनिर्मुक्तः सुवर्णघनवद्विज्ञानघनश्चिन्मात्रस्वभाव आत्मा यदाऽवभासते तदा त्वंपदार्थः प्रत्य-

---

* 'सर्व एव आत्मानो' इत्येतत्कलिकातामुद्रित बृहदारण्यकपुस्तके नास्ति ।

Digitized by Google

गात्मेत्युच्यते" इति श्रुतिभ्यः। त्वंपद-तत्पदयोरभेदेऽसिपदम् सोपाधि-निरुपाधिहीनसदात्मत्वात्। "भूय एव मा भगवान्विज्ञापयतु यद्वै मनसा ध्यायति स तद्वाचा वदति। स य एषोऽणिमा ऐतदात्म मिद ँ सर्वं तत्सत्य ँ स आत्मा। तत्त्वमसि श्वेतकेतो" [छां०उ०प्र० ६खं० ८] इति क्रमेण नवधोपदेशस्तत्त्वमस्यात्मकमहावाक्यस्य ग्रन्थबाहुल्यभयान्न लिख्यत इति। त्वंपदार्थादौपाधिकात्तत्पदार्थादौपाधिकाद्विलक्षण आकाशवत्सूक्ष्म एव केवलसत्तामात्रोऽसिपदार्थः स्वयंज्योतिरात्मेत्युच्यते। "त्वंपदार्थतत्पदार्थसाम्यं आत्मेत्युच्यते" इत्यादि श्रुतिभ्यः।

अधुना तत्त्वमस्यात्मकगणेशस्वरूपं वर्ण्यते। त्वमेव प्रत्यक्षं तत्त्वमसीति मूलवाक्यप्रतिपादनार्थत्वात्। त्वंपदार्थो नरात्मकस्तत्पदार्थो गजात्मकश्च तयोरभेदेऽसिपदार्थो गणेशाकृतिमयः। प्रत्यक्षं तत्त्वमसीति प्रत्यक्षवाक्यप्रामाण्यात्। तद्यथा। नरः प्रणवात्मकः। सोपाधिब्रह्मात्मकत्वात्। स एव त्वंपदार्थः। प्रणवपरसोपाध्यभावात्। "ओमित्येकाक्षरं ब्रह्मेदं सर्वं तस्योपव्याख्यानं सर्वं भूतं भव्यं भविष्यदिति सर्वमोङ्कार एव" इति श्रुतेः। "सोपाधिकः स्यात्सर्वत्र" इतिस्मृतेः। "आपो नारा इति प्रोक्ता आपो वै नरसूनवः" इति श्रुतेः। आप उपलक्षितानि पञ्चभूतानि ग्राह्याणि। वेदभाष्ये शङ्कराचार्यवचनात्। "नराज्जातानि तत्त्वानि" इतिस्मृतेः। प्रणवात्तत्त्वोत्पत्तिः। सर्वशास्त्रसम्मतत्वात्। नारायणोपनिषदि नारायणनामार्थप्रतिपादने नराज्जाता नाराः ता एवाऽयनं यस्येति नारायणः। प्रणवमयत्वात्। प्रणवोपासकसंन्यासिनां नारायणसंज्ञात्मकत्वात्। "दण्डग्रहणमात्रेण नरो नारायणो भवेत्" इति स्मृतेः। गाणेशे "यस्मादोङ्कारसम्भूतिर्यतो वेदा यतो जगत्" इति स्मृतेः त्वंपदार्थो नरात्मकः। तदैक्यसत्तामयत्वात्। अथ गजशब्दार्थः कथ्यते। तत्पदैक्यसत्ताप्रतिपादनार्थत्वात्। समाधिना योगिनो यत्र गच्छन्तीति गः। यस्माद्बिम्बप्रतिबिम्बवत्तया प्रणवात्मकं जगज्जायत इति जः। गश्चासौ जश्च गजः। विश्वकारणत्वात्। "जन्माद्यस्य यतः" [अ० १ पा० १ सू० २] इति व्याससूत्रात् "यस्मादोङ्कारसम्भूतिर्यतो वेदो यतो जगत्" इति गाणेशात्। न चैवं-विपरीतो गजपदार्थ आदौ लयः पश्चात्सृष्टिः गकारजकारमयत्वात्-इति वाच्यम्। आदावेव समाधिना योगिनो यत्र गच्छन्तीति फलं दर्शयित्वा स्वानुकूलं शिष्यं कृत्वा पश्चात्तत्स्वरूपदर्शनार्थं तस्मात्सृष्टिरुक्ता। शिष्यबोधार्थत्वात्। नचैवं-अन्नं ब्रह्म, गजशब्दाख्यं

---

१ ग० गणेशतापिन्यांश्रुतेः.

Digitized by Google

"अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते" [तै० उ० अ० ३ अ० २ कं० ३६] इतिश्रुतिप्रतिपादितब्रह्मणामपि सर्वभूतोत्पत्तिलयकारकत्वाद्-इति वाच्यम् । प्राणब्रह्मणि अन्नस्योत्पत्तिलयदर्शनात् । तद्ब्रह्मानारण्यकप्रतिपादितब्रह्मणामप्युत्पत्तिलयकथनान्महावाक्यप्रतिपाद्यब्रह्मजगत्कारणनिर्गुणैकसम्भवत्वात्, तस्मात्परकारणाभावाच्च । तदेव गणेशतापिन्याम् । "अप्राप्यं चाप्राप्यं च, अज्ञेयं चाज्ञेयं च, विकल्पासहिष्णु तत्सशक्तिकं गजवक्त्रं गजाकारं जगदेवावरुन्धे" इति श्रुतेः । अस्यायमर्थः । अप्राप्यं चाप्राप्यं मनोगतिशून्यं यद्यत्प्राप्यते तत्तन्मनोगतियुक्तत्वात् । अत्र वीप्सा हि आग्रहप्रदर्शिनी । कदापि प्राप्यत्वाभावात् । अज्ञेयं चाज्ञेयं च वाण्या च वक्तुमशक्यं वाण्याऽकथितम्, मनोऽध्येयत्वात् । पूर्ववद्वीप्सा ज्ञातव्येति । विकल्पासहिष्णु विकल्पशून्यम्, निर्गुणत्वात् । तत्सशक्तिकं, निरुपाधिमायायुक्तत्वात् । "त्वंपदार्थादौपाधिकात्तत्पदार्थादौपाधिकात्" इति श्रुतेस्तत्पदार्थसशक्तिकात्मकत्वसम्भवात् । गजवक्त्रं तत्पदार्थमयगणेशवक्त्रमात्रत्वाद्गज इव वक्त्रमिति व्युत्पत्तिसम्भवाच्च । गजाकारं जगत् ओङ्कारात्मकं जगत्सोपाधि ब्रह्म, जगन्मयत्वात् । तदेव गणेशतापिन्याम् । "ततश्चोमिति ध्वनिरभूत्तत्स वै गजाकार अनिर्वचनीया सैव माया जगद्बीजमित्याह । सैव प्रकृतिरिति गणेश इति प्रधानमिति च माया शबलमिति च" इति श्रुतेः । गजाकारोङ्कारप्रतिपादनात्तदेव जगन्मयत्वाद्बिम्बप्रतिबिम्बवद्गजशब्दाख्यब्रह्मणो गजाकारोङ्कारोत्पत्तिदर्शनाद्गजस्याकार इवाकारो यस्येति व्युत्पत्तिसम्भवात्साक्षाद्गजमयाभावात् गजाकारश्रुतिप्रतिपादनाच्च । एवावरुन्धे गजाकारं जगद्यदुत्पन्नमादौ यदाधारं मध्येऽन्ते यन्मयमित्यर्थः, अवरोधनार्थसम्भवात् । इति गजशब्दाख्यतत्पदार्थैक्यप्रतिपादनम्, श्रुतिप्रमाणत्वात् । नर-गजयोरभेदेऽसिपदात्मको गणेशदेहः सम्पूर्णस्तत्त्वमस्यात्मकः, प्रत्यक्षमधुनापि सावयवत्वात् । सोपाधिर्नरस्त्वंपदार्थात्मको गणेशदेहः, पादादिकण्ठपर्यन्तं नराकृतिमयगणेशदेहत्वात् । सोपाधिनिकृष्टत्वादधमाङ्गमित्यर्थः । निरुपाधिर्गजस्तत्पदार्थात्मको गणेशदेहः, कण्ठादिमस्तकपर्यन्तगजाकृतिमयगणेशदेहत्वात् । निरुपाधिसर्वोत्कृष्टत्वादुत्तमाङ्गमित्यर्थः । तयोर्योगेऽसिपदार्थमयो गणेशदेहः, सम्पूर्णपादादिमस्तकपर्यन्तप्रतिपादनत्वात् । ब्रह्मगणेशयोरभेदः कृतः तत्रातिव्याप्त्यव्याप्तिदोषासम्भवः, सामान्यानुमानसम्भवात् । तद्वत्सर्वदोषनिराकरणसामर्थ्यादत्र ग्रन्थे सर्वत्रैव दोषासम्भवात् । अत्र सिद्धि-बुद्धियुक्तोऽपि प्रतिपादितः पञ्चचित्तवृत्तिमयी बुद्धिस्तद्धर्षविषादादिमोहप्रदा सिद्धिः, "योगश्चित्तवृत्तिनिरोधः" [पा० १ सू० २] इति पातञ्जलसूत्रात् ।

Digitized by Google

एवं सम्पूर्णतत्त्वमस्यात्मकं गणेशं प्रतिपाद्य अधुना त्वंपद-तत्पदासि-पदभिन्नभावशोधनार्थं ग्रन्थारम्भः क्रियते । तत्र त्वंपदशोधनार्थमाह—

त्वमेव केवलं कर्तासि ।

त्वमिति । त्वमेव तत्त्वमसिमयः सन् त्वंपदार्थव्यवहारसत्तामधारकः, प्रणवांशमयत्वात् । केवलं कर्तासि । केवलं यथातथाऽव्यक्तादिस्थूलदेहपर्यन्तं जगन्निर्माणकारकः, ओङ्कारात्तत्त्वोत्पत्तिदर्शनात् । तथापि तद्भावशून्यो बिम्ब-प्रतिबिम्ववदोङ्कारमयः, केवलपदग्रहणात् । तद्वत्—

त्वमेव केवलं धर्तासि ।

जगत्पालकोऽसि, नाम-रूप-कर्मभेदतया स्वस्वकर्मानुसाराकृतिभोगप्रदत्वात् । तद्वत्—

त्वमेव केवलं हर्तासि ।

माकृतलयप्रवर्तकत्वात् ।

एवं त्वंपदार्थं केवलमिति पदेन तदुपाधिहीनतया शोधयित्वा तत्पदार्थशो-धनार्थमाह—

त्वमेव सर्वं खल्विदं ब्रह्मासि ।

सन् तत्पदार्थव्यवहारसत्तामधारकः, सर्वोपाधिवर्जितांशमयत्वात् । सर्वं खल्विदं ब्रह्मासीति । सर्वमिदमोङ्कारमयं जगत् खलु नानोपाधिसंशयहीनम् । त्वमिति त्वमेव तत्त्वमसिमयः, सदैव ब्रह्मैक्यभावप्रतिपादनत्वात् । ब्रह्मासि तत्पदार्थमयत्वात् । "सर्वं खल्विदं ब्रह्म । तज्जलानीति शान्त उपासीत" इति श्रुतेः । अत्र शान्त उपासीतेति सर्वोपाधिभावमनाहत्य ब्रह्मैक्यभावप्रतिपादन-त्वात् । तत्पदार्थप्रतिपादकमिदं महाकाव्यं, तज्जलानिति सर्वकारणप्रतिपाद-कत्वात् । एवं तत्पदार्थं ब्रह्मासीति वचनसामर्थ्याच्छोधयित्वाऽसिपदशोधना-र्थमाह—

त्वं साक्षादात्माऽसि नित्यम् ।

त्वमिति । साक्षादात्मासि नित्यमिति कार्यकारणैक्यभावत्वादात्मनः सातत्य-गमनं नित्यम्, सर्वाभेदमयत्वात् । त्वंपदार्थात्मा, तदभिन्नत्वात् । तत्पदार्थात्मा, तदभिन्नत्वात् । एवं यद्यन्मनोवाणीमयं तद्धीनं च तत्र तत्तदभिन्नतया तदात्मा

---

१ क० ग० घ० ङ० पुस्तकेषु 'णत्वात्' इति पाठान्तरम् ।

Digitized by Google

तदापि तत्तदुपाधिभावहीनत्वाच्चित्यमिति पदं न कार्यं न कारणम्, आत्मनि सर्वाख्याभावात् ॥ इति अधिदैवतप्रतिपादकः प्रथमः खण्डः ॥ १ ॥

एवं त्वंपदार्थं तत्पदार्थमसिपदार्थं च शोधयित्वा तत्तत्पदार्थमयं गणेशं प्रतिपाद्य एतत्प्रमाणार्थं स्वप्रतिज्ञां प्रदर्शयन्नाह ।

ऋतं वच्मि । सत्यं वच्मि ॥ २ ॥

ऋतमिति । ऋतमनृतात्मकासुरभावाभिमानशून्यं, यथार्थगणेशभक्त्यभिमानहीनभाषणत्वात् यथावेदानुभवप्रतिपादनत्वाच्च । वच्मीति कथयामीति । सत्यमिति । सदा देश-काल-वस्तु-निमित्तेषु विनश्यत्सु यदविनाशि तत्सत्यम् सर्वबाधहीनत्वात् । शिव-विष्ण्वादिनानाब्रह्मप्रतिपादनात्मकदेहेषु गणेशदेहः सम्पूर्णब्रह्मैक्यभावमयः, महावाक्यमयनर-गजाभेदाकृतिधारकत्वात् । इदं सत्यमविनाशीति वच्मि कथयामि ॥ इति स्वप्रतिज्ञात्मकः द्वितीयः खण्डः ॥ २ ॥

एवं स्वप्रतिज्ञां सत्यभाषणात्मिकां प्रदर्श्य ऋत-सत्यभाषिणं गणेशो रक्षति सदा, यथार्थस्वभक्तिलुब्धत्वात् तदधीनो भवति । तदेव प्रकटयन्नाह ।

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् ।
अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् ।
अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् ।
अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् ।
सर्वतो मां पाहि पाहि समन्तात् ॥ ३ ॥

अवेति । त्वं साक्षात्प्रत्यक्षं तत्त्वमस्यात्मकः, अतो मामव । ऋत-सत्यभाषिणं धर्मार्थ-काम-मोक्ष-ब्रह्मभावार्थिनं मां नानाविघ्नसमुदायाद्रक्षेति स्वप्रतिज्ञापालको भव, भक्ताधीनत्वात् । अवेति । अत्र अव त्वं माम् अव वक्तारम् इत्यादिपदेषु सन्धिरार्षः । एवं सर्वत्र ज्ञातव्यम् । वेदेच्छायाः प्रमाणत्वात् । वक्तारं मां त्वद्रूपप्रतिपादकं तदनुष्ठानफलवक्तारं च यथार्थप्रदो भव, मदीयकृतफलश्रुतिभोगप्रदत्वात् । श्रोतारं मां मत्कृताथर्वशीर्षादित्वत्स्तुतियथार्थपाठकनानाजनपरीक्षार्थं तच्छ्रवणकर्तारमव, यथार्थश्रोतृप्रियत्वात् । दातारं अथर्वशीर्षादित्वदुपासनदातारं मामव, यथाऽथर्वशीर्षपरम्परासम्प्रदायप्रवर्तकप्रियत्वात् । धातारं त्वत्प्रियकर्मोपासन-ज्ञानयोगसाधनस्रष्टारं मामव, यथार्थसाधनप्रियत्वात् । अनूचानं त्वत्प्रियान्यर्षिप्रोक्त-

---

१ ख० पुस्तके 'पश्चात्' मूले पाठान्तरम् दृश्यते परं नैतत्साधु ।

२ सर्वेष्वादर्शपुस्तकेषु 'ोभूतार्थिनं' इतिवर्तते तत्प्रामादिकमेवेति प्रतिभाति ।

Digitized by Google

मार्गभ्रक्तं कदाचित् भ्रान्तितया संशययुक्तं-तत्संशयनाशकारकं मामव, स्वभक्तभ्रान्तिनाशकप्रियत्वात्। शिष्यम्, मद्बुद्धिस्थेन त्वयोपदिष्टत्वात्। ज्ञानशिक्षाशीलं मामव, स्वशिष्यप्रियत्वात्। पश्चात्तात् स्वद्भक्तिशीलनाशकनानाविघ्नेभ्यो मत्पृष्ठभागदिक्स्थितेभ्यो मामव, स्वभक्ताज्ञातविघ्ननाशकत्वात्। तद्वत्पुरस्ताद्विघ्नेभ्यो मामव इति तद्वदुत्तरदक्षिणोर्ध्वाधराज्ञातव्याः। दशदिग्रक्षणप्रार्थनामतिपादकत्वादेकार्थः। सर्वतो विदिगान्तरबाह्यादिनानास्थानस्थितविघ्नेभ्यो मां पाहि पाहि। आदराद्वीप्सा। समन्ताद्ब्रह्माण्डान्तरगतभयात्पाहीति भावः॥ इति तृतीयः खण्डः॥ ३॥

एवं ऋत-सत्यशीलरक्षणात्मकप्रार्थनां विधाय हृदिस्थं बुद्धि-परबुद्धिचालकं नानासिद्धिप्रदायकं च गणेशं प्रार्थयन्नाह—

त्वं वाङ्मयस्त्वं चिन्मयस्त्वमानन्दमयस्त्वं ब्रह्ममयस्त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि॥ ४॥

त्वमिति। अत्र "सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्" [तै० व० २. अ०१] इतिमहावाक्यप्रतिपादकश्रुत्यर्थं प्रतिपादयति। निहितं गुहायामिति, हृद्यवस्थितब्रह्मत्वात्। वाङ्मयः, वाणीकथितनामरूपमयत्वात्। "एषां पृथिवी रसः। पृथिव्या आपोऽपामाषेधयस्तासां पुरुषस्तस्य वाक्" इति श्रुतेः। त्वं चिन्मयः, नामरूपाहङ्कृतियुक्तो जीवः, तद्भोगकृतत्वात्। "स एव इह प्रविष्ट आनखाग्रेभ्यो यथाऽक्षुरः क्षुरेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये। तं न पश्यत्यकृत्स्नो हि सः। प्राणमेव प्राणोनाम भवति वदन्वाक् पश्यंश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवति आत्मेत्येवोपासीत। अत्र ह्येते सर्व एकं भवति तदेतत्पदनीयमस्य सर्वस्य यदयमात्माऽनेन ह्येतत्सर्वं वेद यथाह वै पदेनानुविन्देदेवं कीर्तिं श्लोकं विन्दते य एवं वेद" इति "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादि श्रुतिभ्यः त्वमानन्दमय-वाङ्मय-प्रकृतिमय-चिन्मय-पुरुषमयस्ताभ्यां सृष्ट आनन्दः सुषुप्त्यवस्थात्मकस्त्वन्मयः, पञ्चकोशबीजत्वात्। "आनन्दो ब्रह्मेति व्यजानात्" [तै० व०३ अ० ६] इति श्रुतेः। त्वं ब्रह्ममयः, वाङ्मय-चिन्मयानन्दमयैक्यात्मकत्वात् सदा सत्यपदात्मकत्वाच्च। एतेषां

---

१ ख० ग० घ० ङ० पुस्तकेषु 'घिनं च' २ घ० ङ० भवंति

Digitized by Google

समुदायार्थैक्यभावप्रतिपादनार्थत्वान्महावाक्यात्मकमाह—त्वं सच्चिदानन्दाद्वितीयोऽसि इति । सत् प्रकृतिभावदोषहीनत्वात्, चित् चैतन्यात्मकत्वात्, आनन्द आसमन्ताभ्यवस्थानन्दात्मकत्वात्, अद्वितीयः सच्चिदानन्दभेदशून्यत्वादिति । इदं महावाक्यं गौणं, षोडशमहावाक्यप्रामाण्यात् । चत्वारि महावाक्यानि मुख्यानि, तत्त्वमस्यादीनि केवलयोगप्रतिपादनवेदान्तसीमाभूतत्वात् । अनन्तं ब्रह्मेतिप्रतिपादयन्नाह । त्वमिति । देहलीदीपन्यायवत्सत्यज्ञानोभयाभेदमयमुभयप्रकाशकतन्मध्यप्रतिपादनत्वात् । त्वं प्रत्यक्षं ब्रह्मासि, चिन्तामणिनामा, चित्तप्रकाशकत्वात् । प्रत्यक्षं हृद्यवस्थितं त्वां पश्यामीति स्वानुभवप्रदर्शनात् । "चिति स्मृतौ" इति धातुपाठात् । "इदितो नुम्" इति पाणिनिसूत्राच्चिन्तायां स्मृत्यां मणिरिव तत्प्रकाशकः । सर्वहृद्यवस्थितं ब्रह्म त्वमेवेति भावः । एवं सत्यं ब्रह्म गुहायां निहितं प्रतिपादितम् । "द्वेवाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च" इति श्रुतेः । "सच्च त्यच्च तयोर्योगे सत्यं ब्रह्म" इति श्रुतेः । एवं ज्ञानं ब्रह्मेतिप्रतिपादयन्नाह । त्वं ज्ञानमयः । सच्चिदानन्दाद्वितीयात्मकसत्यब्रह्मणोऽभिन्नःसदा निर्विकल्पात्मकत्वात्सदैकमयत्वात्सत्यब्रह्मणि सच्चिदानन्दाद्वितीयेषु स्वस्वरूपज्ञानप्रदत्वात् । 'ज्ञा' अवबोधन इति धातुपाठात्स्वयं सर्वज्ञः, स्वस्य ज्ञात्रभावात् । ज्ञानेन ज्ञायते सर्वं ज्ञानं केन न ज्ञायते ज्ञानात्परज्ञानाभावादिति । विज्ञानमयोऽसि सर्वज्ञभावं त्यक्त्वा स्वमहिम्नि स्थितोऽसि, केवलज्ञानब्रह्ममयत्वात् । नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, अविनाशित्वात् । "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतेः । अनन्तं ब्रह्म । सत्यज्ञानैक्यात्मकमात्मस्वरूपं हृदि तत्त्वमस्यात्मकार्थप्रतिपादकमहावाक्यात्सत्यं, त्वम्पदार्थमयत्वात् तज्ज्ञानं तत्पदार्थमयत्वादनन्तमसिपदार्थमयत्रिविधपदार्थैक्यात्मकब्रह्मप्रतिपादनार्थत्वात् । निहितं गुहायां गुहा बुद्धिस्तस्यां निहितम्, हृद्यवस्थितबुद्धिपतित्वात् । पञ्चचित्तव्यापारहर्षविषादसमभावयुक्ततत्तद्व्यापारसिद्धिप्रदसिद्धिपतित्वाद्गणेशो हृद्यवस्थितः । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुत्यनुभवैक्यात्मगणेशत्वात् । परमे व्योमन्निति दहरोपासनार्थं तदेव कथ्यते । "अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं । तद्वाव विजिज्ञासितव्यं स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते "एष आत्मा अपहतपाप्मा विजरो विमृत्यु-

---

१ ख० ०दैक्य०. २ ख० ग० घ० ङ० ०त्वात् ज्ञानं ।

Digitized by Google

र्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः" इत्यादि श्रुतिभ्यः स्वहृद्याकाशस्थितत्वात्। अत्र त्वं प्रत्यक्षं ब्रह्मासीति प्रतिपादनात् हृद्यवस्थितगणेशो ग्राह्यः। प्रत्यक्षं तत्त्वमसीति प्रथमं प्रतिपाद्य पुनः प्रत्यक्षं ब्रह्मासीति पुनरुक्तिनिवारणत्वात्। न च-एवं सद्ब्रह्मादिवर्णनं पूर्णब्रह्मप्रतिपादकं "सदेव सौम्येदमग्र आसीत्" इत्यादिश्रुतिभामाण्यात्-इतिवाच्यम्। प्रत्यक्षं तत्त्वमसीत्यत्र मयट्प्रत्ययाभावात्संपूर्ण ब्रह्मात्र प्रतिपाद्य पुनस्त्वं वाङ्मयादिमयट्प्रत्ययप्रयुक्तत्वाद्गौणब्रह्मवर्णनमत्रैव मयड्हीनयुक्तप्रतिपादनत्वात्॥ इत्यध्यात्मप्रतिपादकश्चतुर्थः खण्डः॥ ४॥

एवं हृद्यवस्थितं गणेशं प्रतिपाद्याऽव्याकृतब्रह्मात्मकं प्रतिपादयन्नाह.

सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक् पदानि॥ ५॥

सर्वमिति। सर्वं जगदिदं त्वत्तो जायत इति। त्वत्तोऽव्याकृतात्मन इदं जगज्जायते। अवस्थामयव्याकृतत्वात्। तदेवोङ्कारात्मकगणेशप्रतिपादनत्वात्। गणेशतापिन्याम्। "ततश्चोमिति ध्वनिरभूत् स वै गजाकारो ऽनिर्वचनीया सैव माया जगद्बीजमित्याह। सैव प्रकृतिरिति गणेश इति प्रधानमिति च मायाशब्दमिति च" इति श्रुतेः। "ओमित्येकाक्षरं ब्रह्मेदं सर्वं ब्रह्म" इति श्रुतेः। गाणेशे पार्वत्या तपः कृतं तस्यै वरदानार्थमागतो गणेशश्चोङ्कारात्मकः, तद्रूपधारकत्वात्। तद्यथा।

"मध्ये नारायणमुखो दक्षिणे च शिवाननः।
वामे ब्रह्ममुखोऽनन्ते पद्मासनगतो विभुः" इति स्मृतेः।

ब्रह्म-विष्णु-रुद्रात्मानोऽकारोकारमकाराः, कण्ठाधस्तदैक्यभावमयत्वात्। शौ, वे शिवेन शिरश्च्छेदः कृतः शक्तिपुत्रस्य, जीवात्मकत्वात् गणेशाविर्भावहीनत्वाच्च। तत्र पुनर्गजमस्तकमानीय सजीवकरणे ब्रह्मविष्णुमहेशैरोङ्कारावाहनं यदा कृतं तदा गणेशाविर्भावदर्शनात्। देवीभागवतेऽप्येवं वर्णनत्वाद्गणेशस्य ओङ्कारजगदात्मकत्वात्। शिवपुराणेऽपि गणेशावतारवर्णन आवाहनदर्शनाच्छिवैक्यप्रतिपाद-

---

१ ग० ङ० ०सर्वब्रह्मादि०
२ ख० ग० घ० ङ० सर्वं मितिश्रुतेः
३ ख० ग० घ० ङ० णित भावा

Digitized by Google

नपुराणप्रतिज्ञारक्षणाच्च । न चैवं शिव-विष्ण्वादय ओङ्कारात्मकास्तत्तन्माहात्म्य-श्रुतिस्मृतिप्रतिपादनत्वादिति वाच्यम् । तामस-सात्विकादिस्वस्वैकगुणमयदेहप्रचुरत्वात् । सर्वसारनिर्णयग्रन्थे मया प्रतिपादितमत्र न लिख्यते, ग्रन्थबाहुल्यभयात् । तद्वत्सर्वं जगदिदं त्वत्तस्तिष्ठति, स्वस्वकर्मानुकूलपालनभावधारकत्वात् । तद्वत्त्वयि लयमेष्यति, कल्पान्तमयत्वात् । तद्वत्सर्वं जगदिदं त्वयि प्रत्येति, प्राक्तनलये गुणसाम्यमयत्वात् । " त्वय्येत्य सदेव अग्र आसीत् " इति श्रुतिप्रामाण्यात् । त्वं भूमिरापोऽनलोऽनिलो नभः, स्थूल-सूक्ष्म-समपञ्चभूतमयप्रणवत्वात् । " अस्यात्मन आकाशः संभूतः " इति श्रुतेः । प्रणवविशिष्टात्मनः पञ्चभूतोत्पत्तिप्रतिपादनत्वात् । त्वं चत्वारि वाक्पदानि । परा-पश्यन्ती-मध्यमा-वैखर्यश्चतस्रो वाचस्त्वच्छ्वाससंभवधर्माधर्मसमज्ञानबोधमयत्वात् । " सयथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यद्ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या-उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यातान्यस्यैवैतानि सर्वाणि निःश्वसितानि" इति श्रुतेः प्रणवनिःश्वासमयवेदादित्वात् । " ओङ्कारप्रभवा वेदाः " इति स्मृतेः ॥ इत्यधिदैवतवर्णनात्मकः पञ्चमः खण्डः ॥ ५ ॥

एवमव्याकृतमयं गणेशं प्रतिपाद्य सर्वजनमूलाधार-स्थितिं प्रतिपादयन्नाह.

त्वं गुणत्रयातीतः । त्वमवस्थात्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवःस्वरोम् ॥ ६ ॥

त्वमिति ॥ त्वं गुणत्रयातीतो नानाजनदेहमूलाधारः स्थितः संत्रिगुण-दोषप्रवृत्तिप्रकाशाज्ञानवर्जितो लिङ्गचक्रस्थराजस-नाभिचक्रस्थसात्विक-हृत्चक्र-स्थतामसभावहीनत्वात्त्रिगुणमूलाधारमयः, प्रणवमयत्वात् । त्वमवस्थात्रयातीतः जाग्रत्स्वप्नसुषुप्त्यवस्थाभावहीनत्वात् । त्वं देहत्रयातीतः, स्थूल-सूक्ष्मानन्द-देहषड्भावहीनत्वात् । त्वं कालत्रयातीतः, उत्पत्ति-स्थिति-लयकालभावहीनत्वात् । त्वं मूलाधारस्थितोऽसि नित्यम् । गुदचक्रं प्रणवमयं तत्र स्थितः, सर्व-

---

१ ख० ग० घ० ङ० णित आवा २ ख० ग० घ० ङ० हृच्चक्र

Digitized by Google

चक्रमूलाधारमयत्वात् । मूलाधारसंज्ञाख्यं, सदाखण्डस्वानन्दघनत्वात् नित्यं-त्रिगुणभाववर्जितत्वाच्च । त्वं शक्तित्रयात्मकः । जगदुत्पत्ति-स्थिति-लयत्रिविधशक्त्याधारात्मकत्वात् । त्वां योगिनो ध्यायन्ति नित्यम् । स्वात्मानंन्दब्रह्मैक्यं समाधिना कृत्वा जीवन्मुक्ततया देहप्रारब्धभोगप्रतीक्षका योगिनस्त्रैगुण्यात्मकं त्वां नित्यममृतात्मकत्वाद्ध्यायन्ति, स्वदेहमूलाधारचक्रस्थध्यानसुलभत्वात् । त्वं ब्रह्मा जगत्सृष्टिनिर्माणकर्ता, रजोविशिष्टप्रवणत्वात् । त्वं विष्णुर्जगत्पालकः, सत्त्वविशिष्टत्वात् । त्वं रुद्रो जगत्संहारकः, तमोविशिष्टत्वात् । त्वमिन्द्रस्त्रिभुवनैश्वर्यभोक्ता, परमैश्वर्यविशिष्टत्वात् । त्वमग्निः सर्वयज्ञभोक्ता । सर्वदेवमुखतृप्तिकारकविशिष्टत्वात् । त्वं वायुः सर्वप्राणभूतसर्वजनप्राणप्रवेश-स्थापनोत्क्रमणविशिष्टत्वात् । त्वं सूर्य उदयास्त-दिवस-रात्रिप्रकाशकः, सर्वजनकर्मप्रवर्तकविशिष्टत्वात् । त्वं चन्द्रमाः सर्वौषधिजीवनात्मकः, जगदन्नमयविशिष्टत्वात् । ब्रह्मादिचन्द्रपर्यन्तानामष्टानां स्वस्वव्यापारप्रवर्तकात्मकः । श्रुतयो न लिरूप्यन्ते, सर्वप्रसिद्धत्वात् । एतदन्तर्गतदेवदेवेश्वरा ज्ञातव्या, अष्टविशिष्टगणेशप्रतिपादनत्वाद्विचारतदन्तर्गतसम्भवाच्च । त्वं ब्रह्म सर्वजनबुद्धिस्थजीवमयो, नानास्वभावप्रकृतिभोक्तृविशिष्टत्वात् । भूः भूर्लोकस्त्वमेव, तद्विशिष्टत्वात् । भुवः भुवर्लोकस्त्वमेव, तद्विशिष्टत्वात् । स्वः स्वर्लोकस्त्वमेव, तद्विशिष्टत्वात् । ॐ प्रणवस्त्वमेव, सर्वमूलाधारचक्रस्थितविश्वपालकत्वात् ॥ इत्यध्यात्मप्रकाशकः षष्ठः खण्डः ॥

एवं साधिदैवताध्यात्मप्रकारयुक्ततत्त्वमस्यात्मकं प्रणवात्मकं च गणेशं प्रतिपाद्य तदनुभवप्रकाशकगणेशविद्यां प्रकटयन्नाह–

गणादिं पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् ।
अनुस्वारःपरतरः । अर्धेन्दुलसितम् ।
तारेण रुद्धम् । एतत्तव मनुस्वरूपम् ।
गकारःपूर्वरूपम् । अकारो मध्यमरूपम् ।
अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् ।
नादः सन्धानम् । स ꣳहिता सन्धिः ।
सैषा गणेशविद्या । गणक ऋषिः ।
निचृद्गायत्रीछन्दः । गणपतिर्देवता । ॐ गं ॥ ७ ॥

---

१ क० ख० ग० घ० ङ० नं ब्रह्मैक्यं २ ग० न्तरूपं

Digitized by Google

गणादिमिति । पूर्वं प्रथमं गणादिं गकारं, गणशब्दादिभूतत्वात् । उच्चार्य स्वमुखेनोच्चारणं कृत्वेति । तदनन्तरं वर्णादिः । वर्णा अक्षराणि तदादिरकारः, तस्य आदौ कथितत्वात् । तस्मादकारात्परतरोऽनुस्वारः । गकार आदिस्तस्मात्परोऽकारस्तस्मात्परोऽनुस्वारः परतरः । कीदृशोऽनुस्वारः अर्धेन्दुलसितः, सानुनासिकत्वात् । एवमेकाक्षरमन्त्रात्मिकां विद्यां प्रतिपाद्य सशक्तिकमन्त्रं प्रकटयन्नाह । तारेणेति । तारेण प्रणवेन †ऋद्धं युक्तम् । प्रणवयुक्तैकाक्षरमन्त्रत्वात् । तत्रादौ प्रणवमुच्चार्य पश्चादेकाक्षरोच्चारणम् । " आदौ प्रकृतिमुच्चार्य पश्चात्पुरुष उच्यते " इति स्मृतेः । रुद्रयामले एकाक्षरगणेशकवचे मन्त्रोद्धारः कृतः । तत्र प्रणवस्य शक्तित्वप्रतिपादनात् । तद्यथा ।"गं बीजं शक्तिरोङ्कारः सर्वकामार्थसिद्धये " इति । तव गणेशस्य मनुस्वरूपं मन्त्रस्वरूपमेतत्, सर्वसिद्धिप्रदगणेशानुभवप्रकाशकसामर्थ्ययुक्तत्वात् । एवं 'गणादिं पूर्वमुच्चार्य'इत्यादि-'तारेण ऋद्धं'इत्यन्तेन सङ्केतश्रुतिवाक्यप्रतिपादितमन्त्रं जना न ज्ञास्यन्ति, मन्दबुद्धित्वात् । तदर्थं स्वयमेव सुलभतया तदेवाह । गकार इति । पूर्वरूपं आदिप्रोक्तरूपं गकारः, मध्यमरूपं अकारः, अन्त्यरूपं अनुस्वारः, उत्तररूपं अनुस्वारोत्तररूपं बिन्दुः, सानुनासिकात्मतकत्वात् । तारशब्दस्तु न वर्ण्यते, स्फुटत्वात् । एतेषां भिन्नानां गकारादिचतुर्णां सन्धानमेकीकरणसाधनं नादः, नादप्रेरितैकभावोच्चारणयोग्यसामर्थ्यात् । एतेषां नादप्रेरितानां सन्धिः सम्मीलनं संहिता, यथाक्रमोच्चारणैक्यभावप्रकाशकत्वात् । या 'गणादिं पूर्वमुच्चार्य ' इत्यादि-' तारेण ऋद्धं ' इत्यन्तेन पूर्वं प्रतिपादिता सैषाऽधुना-' गकारः पूर्वरूपं ' इत्यादि-' संहिता सन्धिः ' इत्यन्तेनप्रतिपादितत्वात्। गणेशविद्या गणेशज्ञानप्रदा, मन्त्रात्मकगणेशमूर्तिमयजपस्य गणेशसन्तुष्टिकारकत्वात् । विद् ज्ञाने इति धातुसामर्थ्यात् एकाक्षरमन्त्रस्तत्त्वमस्यात्मकगणेशमयः प्रतिपादितः । यन्त्रस्थमन्त्रपूजनस्य सर्वसिद्धिप्रदत्वान्मन्त्रमयमूर्तेः सर्वशास्त्रप्रतिपादितत्वाच्च । तत्रोङ्कारयुक्त ओङ्कारशक्तिविहारजगन्मयप्रतिपादितत्वात् पूर्वोक्ततत्त्वमस्यात्मकोऽङ्कारात्मकद्विविधसामर्थ्ययुक्तत्वं मन्त्रस्य प्रतिपादितम्, तदुपासनस्य प्रत्यक्षगणेशसमत्वात् । गणकऋषिः । अत्रर्ष्यादिन्यासा मन्त्रशास्त्रोक्ता ग्राह्याः, तस्य वेदोपाङ्गत्वात् । तद्यथा । ॐ अस्यैकाक्षरगणपतिमन्त्रस्य, गणक ऋषिः, निचृद्गायत्री छन्दः, गणपतिर्देवता, गं बीजम्, ॐ

---

* अत्र ' वर्णाअक्षरास्तदादि रकारोकारादिवर्णकथित्वात् ' इति सर्वेष्वादर्शपुस्तकेषु दृश्यते तत्प्रामादिकमिति प्रतिभाति ।

† अत्र सर्वत्रापि ' रुद्धम् ' इति इदानींतनानां केषांचित् वैदिकानां पाटः । अर्थस्त्वेक एव ।

१ ग० ङ० कत्वात् ।

Digitized by Google

शक्तिः, गणपतिप्रीत्यर्थे सकलाभीष्टसिद्ध्यर्थे च जपे विनियोगः । गणकऋषये नमः शिरसि । निचृद्गायत्रीछन्दसे नमो मुखे । गणपतिदेवतायै नमो हृदये । गं-बीजाय नमः गुह्ये । ॐशक्तये नमः पादयोः । अथ षडङ्गन्यासः । ॐ गां अङ्गुष्ठाभ्यां नमः । ॐ गीं तर्जनीभ्यां नमः । ॐ गूं मध्यमाभ्यां नमः । ॐ गैं अनामिकाभ्यां नमः । ॐ गौं कनिष्ठिकाभ्यां नमः । ॐ गः करतल-करपृष्ठाभ्यां नमः । एवं हृदयादिन्यासः कर्तव्य इति । वक्ष्यमाणं ध्यानं कृ-त्वा मानसैः पञ्चोपचारैः पूजयेत् । तद्यथा । ॐ लं पृथिव्यात्मने गणेशाय गन्धं †समर्पयामि । ॐ हं आकाशात्मने गणेशाय पुष्पं स० ॥ ॐ यं वाय्वा-त्मने गणेशाय धूपं स० । ॐ रं तेजा*त्मने गणेशाय दीपं स० । ॐ वं अमृता-त्मने गणेशाय नैवेद्यं समर्पयामि । इति पञ्चभूतबीजात्मकपञ्चोपचारार्पणं[२] मानसी पूजा कथ्यते इति संक्षेपः । सर्वं मन्त्रशास्त्रोक्तविधिवत्कार्यम्, शीघ्रसि-द्धिप्रदत्वात् ॥ इति गणेशविद्यात्मकार्थप्रतिपादकः सप्तमः खण्डः ॥ ७ ॥

एवं गणेशविद्यां प्रतिपाद्य गणेशगायत्रीमन्त्रं प्रकटयन्नाह—

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्ती प्रचोदयात् ॥ ८ ॥

एकदन्तायेति । एकदन्ताय एकशब्दाख्या माया । दन्त शब्दाख्यो मायि-कः तयोर्योग एकदन्तः तस्मै । विद्महे जानीमहे । सदा सर्वप्रदत्वात् । तदेव मौद्गले ।

" एक शब्दात्मिका माया तस्याः सर्वं समुद्भवम् ।
भ्रान्तिदं मोहदं पूर्णं नानाखेलात्मकं किल ॥
दन्तः सत्ताधरस्तत्र माया चालक उच्यते ।
बिम्बेन मोहयुक्तश्च स्वयं स्वानन्दगो भवेत् ॥
माया भ्रान्तिमयी प्रोक्ता सत्ता चालक उच्यते ।
तयोर्योगे गणेशोऽयमेकदन्तः प्रकीर्तितः ॥ " इति ।

---

† अत्र कल्पयामीति युक्तमिति प्रतिभाति । समर्पणं तु प्रत्यक्षतया अर्प्यमाणस्योपचारस्यैव भवति न मानसस्य अतःकल्पयामीत्येव युक्तम् । अन्यत्रापि मानसपूजायां " लं पृथिव्यात्मने गन्धं " कल्पयामि इति दृश्यतेति दिक् ।

* अत्र ' तेज आत्मने ' इति पाठः साधीयानिति भाति ।

१ ग० ॐ ' सं सर्वात्मने गणेशाय सर्वोपचारान् ताम्बूल-दक्षिणा-मन्त्रपुष्पं समर्पयामि ' इति अधिकं ङ० सर्वोपचारानिति नास्ति. २ ख० ग० घ० ङ० ' णत्वान्मानसी ' ३ क० ख० ग० घ० ङ० इति न्तिः.

Digitized by Google

वक्रतुण्डाय । जगत्सर्वजनसाधारणं, मनोवाणीमयत्वात् । तस्माद्वक्रमात्मरूपं मनोवाणीहीनत्वात्तदेव मुखं यस्य स वक्रतुण्डो जगन्मयंकण्ठाध आत्मात्मक-मस्तकत्वात्तस्मै । तद्यथा मौद्गले ।

" बिम्बं मायायुतं वक्रं मोहितं सिद्धि-बुद्धिगम् ।
तद्भावं हन्ति तुण्डेन तेनायं वक्रतुण्डकः ॥
माया मुखं मोहयुतं तस्माद्वक्रमिति स्मृतम् ।
परं ब्रह्म तयोर्योगे वक्रतुण्डोऽयमुच्यते ॥
कण्ठाधो मायया युक्तो मस्तकं ब्रह्मवाचकम् ।
वक्राख्यं तस्य विप्रेश तेनायं वक्रतुण्डकः ॥ " इति

धीमहि ध्यायेम इति । तन्नो दन्ती प्रचोदयात् । तद्ब्रह्मात्मको दन्ती द-न्तोऽस्यास्तीति सर्वसत्तात्मकत्वात् । स्वभक्त्यै प्रचोदयात् प्रेरयतु, बुद्धिपति-त्वात् । अयं गायत्रीमन्त्रोऽपि सर्वसिद्धिप्रदायकः । गणेशः गायकं त्रायतीति व्युत्पत्तिबलात् ॥ इति गायत्रीमन्त्रप्रतिपादनात्मकोऽष्टमः खण्डः ॥ ८ ॥

एवमादौ नाममन्त्रं मध्य एकाक्षरमन्त्रमन्ते गायत्रीमन्त्रं च इति त्रिविधं-मन्त्रं प्रतिपाद्य तद्ध्यानार्थमाह—

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥

एकदन्तमिति । एकदन्तं पूर्वोक्तार्थात्मकैकदक्षिणदन्तयुक्तम् । "भग्नवामरदं" इति स्मृतेः । चतुर्हस्तं, चतुर्भुजयुक्तत्वात् ।

" स्वर्गेषु देवताश्चायं पृथ्व्यां नरांस्तथाऽतले ।
असुरान्नागमुख्यांश्च स्थापयिष्यति बालकः ॥
तत्त्वानि चालयन्विप्रास्तस्मान्नाम्ना चतुर्भुजः ।
चतुर्णां विविधानां च स्थापकोऽयं प्रकीर्तितः ॥ "

---

१ ख० यः २ ख० ग० घ० ङ० याम: ३ क० ख० ग० घ० ङ० कं० ४ ख० दं०

Digitized by Google

इति स्मृतेः । दक्षिणोर्ध्वहस्तादारभ्य दक्षिणाधोहस्तपर्यन्तं पाशाङ्कुश-दन्त-वरदानि धारयति, स्वभक्तरक्षणार्थत्वात् ।

" पाशं मोहमयं तस्य स्वभक्तमोहनाशनम् ।
नियन्त्राख्यं तथा ब्रह्म अङ्कुशश्च महात्मनः ॥
दुष्टनाशकरं ब्रह्म दन्तः सर्वारिनाशकृत् ।
वरं सकामिकानां च कामदं ब्रह्म तत्स्मृतम् ॥ "

इति स्मृतेः । मूषकध्वजम् । सवान्तर्यामी सर्वजन्तुहृद्गतः सन् सर्वजन्तुकृद्भोगभोक्ता चोरो जन्त्वज्ञातसर्वस्वहारकत्वात् जन्तुकृतपाप-पुण्यविवर्जितत्वात् । स एव गणेशसेवार्थं मूषको बभूव । मुष् स्तेये इति धात्वर्थात् । तद्यथा ।

" मूषकं व्यापकाख्यं च पश्यन्ति वाहनं परम् ॥
तेन मूषकवाहोऽयं वेदेषु कथितोऽभवत् ।
मुष्स्तेये तथा धातुर्ज्ञातव्यस्तेयब्रह्मधृक् ॥
नाम-रूपात्मकं सर्वं तत्रासद्ब्रह्म वर्तते ।
नाम-रूपेषु ये भोगास्तेषां भोक्तृतया स्थितः ॥
भोगेषु भोगभोक्ता च ब्रह्माकारेण वर्तते ।
अहंकारयुतास्तं वै न जानन्ति विमोहिताः ॥
वयं भोक्तार एवं ते मानयन्ति विशेषतः ।
ईश्वरः सर्वभोक्ता च चोरवत्तत्र संस्थितः ॥
तदेवं मूषकः प्रोक्तो मनुजानां प्रचालकः ।
मायया गूढरूपः स भोगान्भुङ्क्ते हि चोरवत् ॥"

इति स्मृतिभ्यः । रक्तम्, रक्तवर्णशरीरत्वात् । लम्बोदरम्, स्वोदरे सर्वस्यापि प्रतिष्ठितत्वात् स्वस्य न कस्याप्युदरस्थत्वात्, स्वोदरोद्भवसर्वजगत्वात् स्वस्य न कस्याप्युदरभवत्वाच्च । तथा च ।

" लम्बोदरोऽयमेकश्च वेदे संकथितोऽभवत् ।
न वयं तादृशा वेदे लम्बोदरप्रवाचकाः ॥
तस्योदरात्समुत्पन्नं नानाविश्वं न संशयः ।
नानाब्रह्म तथेशश्च अन्ते तत्र स्थितोऽभवत् ॥
मध्ये कलांशरूपेण क्रीडते गणनायकः ।
अतः सर्वादिपूज्यश्च सर्वपूज्यो बभूव ह ॥
सर्वेषां जनको माता तथा सर्वप्रदायकः ।
तत्र किं संशयं विप्राः कुरुथ ब्रह्मणस्पतौ ॥ "

Digitized by Google

इति स्मृतिभ्यः । शूर्पकर्णकम् । गणेशो योगिमुखोद्गतजनकर्णमार्गहृद्गतः सन् शूर्पवत्पापपुण्यरजो दूरीकरोति, ब्रह्मप्राप्तिकारकत्वात् । तद्यथा ।

" रजोयुक्तं यथा धान्यं रजोहीनं करोति च ।
शूर्पं सर्वनराणां वै योग्यं भोजनकाम्यया ॥
तथा मायाविकारेण युक्तं ब्रह्म न लभ्यते ।
त्यक्त्वोपासनकं तस्य शूर्पकर्णस्य सुन्दरि ॥
शूर्पकर्णं समाश्रित्य त्यक्त्वा मलविकारकम् ।
ब्रह्मैव नरजातिस्थो भवेत्तेन तथा स्मृतः ॥
तेनायं शूर्पकर्णश्च वेदेषु कथितोऽभवत् ।
तं भजस्व विधानेन शान्तियुक्ता भविष्यसि" ॥

इति स्मृतिभ्यः । रक्तवाससम्, सदा रक्तवस्त्रप्रियत्वात् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितमिति, रक्तवर्णप्रियत्वात् । मौद्गले पञ्चवर्णवरप्रदो गणेशो बभूव । तत्र रक्तरङ्गेण पुनस्तपः कृत्वा रक्तरङ्गप्रियः सदा कृतः, स्ववरदानरक्षणार्थत्वात् रक्तवर्णप्रिय इति । भक्तानुकम्पिनम् । तत्र भक्तिर्गणेशैकतत्परा इहलोक-परलोकविषयेच्छाहीनात्मिका, कायिक-वाचिक-मानसिक-सांसर्गिक-तदेकरसयुक्तत्वात् । तद्यथा सङ्क्षेपतः ।

" इत्येवं नवधा भक्तीरसयुक्ता कृता मयि ।
क्षणमात्रं न सहते चित्तं मद्रसवर्जितम् ॥
तदा सम्पूर्णभक्तश्च जातो वै नाऽत्र संशयः ।
अहं मोहेन संयुक्तस्तत्र तिष्ठामि सर्वदा ॥ "

इति स्मृतेः । देवम्, सर्वत्र तत्तद्रूपेण क्रीडाकारकत्वात् । दिवु क्रीडायां इति धात्वर्थात् । जगत्कारणमनादित्वात्सर्वपूज्यादिपूज्यत्वात् । "ज्येष्ठराजम्" इतिश्रुतेस्तज्ज्येष्ठाभावात् । न चैवं-नानावेदशाखापाठेषु कुत्रान्यदेवो ज्येष्ठराजस्तत्परज्येष्ठाभावादिति वाच्यम्, सर्वपूज्यादिपूज्यगणेशान्यहीनत्वात् ज्येष्ठादिपूज्यसर्वपूज्यसम्प्रदायदर्शनात् अन्यत्र लिङ्ग-दैवतवद्गौणत्वाच्च । अच्युतम्, स्वानन्दवासित्वात्कैलास-वैकुण्ठादिलोकगुणमयनाशात्मकत्वाच्च । सर्वसारनिर्णयग्रन्थे मया लोकनिर्णये कथितमत्र न लिख्यते, ग्रन्थबाहुल्यभयात् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् । प्रकृतिः सर्वमयी, प्रकृष्टसर्वाकृतित्वात् । पुरुषः सदैकः । प्रकृतिमयपुरिशयत्वात्ताभ्यां परं, प्रकृति-पुरुषैकात्मकत्वात् । सृष्ट्यादौ प्रकृति-पुरुषसृष्टेरादावाविर्भूतं, तत्त्वमस्यात्मकशरीरत्वात् । एवं नर-गजाभेदैकदन्तादि-

---

१ भक्तानुकम्पितम्. २ कदा सदा. ३ ख० संयुक्तभक्तश्च.

Digitized by Google

चिह्नयुक्तं यो नित्यं ध्यायति स योगी, ब्रह्मैक्यात्मकत्वात्। योगश्चित्तवृत्तिनिरोधः [पा०यो०१सू०२] चित्तं पञ्चविधम्। क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तस्य भूमयः, व्यासकृतभाष्ये प्रतिपादितत्वात्†। तत्र नरेण यत्र चित्तं क्षिप्तं तत्र तदनुभवयुक्तं भवति तत्क्षिप्तम्, सर्वमायामोहयुक्तजनहृत्स्थत्वात्। यत्र नरेण चित्तं क्षिप्तं तज्ज्ञानतया नानाज्ञानभ्रमधारकत्वान्मूढम्, पिशाचतुल्यनरहृत्स्थत्वात्। मुमुक्षूणां चित्तं विक्षिप्तं संसारविषयांस्तिरस्कृत्य ब्रह्मपरं तदपि ब्रह्मानुभवहीनं, विषयासक्तत्वाद्ब्रह्माऽनुभवसुखहीनत्वान्नानातपः परत्वाच्च। अन्न-प्राणाद्यव्याकृतपर्यन्तानुभवयुक्तमेकाग्रं चित्तं, सर्वैक्यसमाधिसुखयुक्तत्वात्। सत्यं ज्ञानमनन्तं ब्रह्मानुभवसुखयुक्तं निरुद्धाख्यं, सर्वैक्यभावहीनत्वाद्ब्रह्मपरत्वाच्च।

" मनसो वृत्तिहीनस्य ब्रह्माकारेण या स्थितिः।
असंप्रज्ञातनामाऽसौ समाधिरभिधीयते " ॥

इति स्मृतेः। ततस्तत्त्वमस्यनुभवसुखयुक्तं निरोधभूमिहीनत्वाच्चित्तवृत्तिनिरोधात्मकं पञ्चभूमिवर्जितं ब्रह्मभूतप्रकाशकत्वात्। त्वंपद-तत्पदाऽसिपदविभागशून्यत्वाच्च। एवं चित्तं जित्वा योगी भवतीति, ब्रह्मैक्यात्मकत्वात्। योगिनां शुक-वामदेवादीनां वरो गणेशभक्तिपरायणत्वात् प्रत्यक्षतत्त्वमसिशरीरभृन्नवधाचित्तप्रवेशकायिक-वाचिक-मानसिक-सांसार्गिकसदाब्रह्मतत्परचेष्टात्मकत्वात् वेदादिहृद्गतज्ञानजनोद्धारकत्वाच्च। न चैवम् योगीदर्शनस्पर्शनादिजनोद्धारकत्वात् प्रारब्धक्षयब्रह्मैक्यत्वात् श्रेष्ठतम इति वाच्यम्। नवधा चित्तशून्यवद्धारकत्वाद्वेदादिहृद्गतनानोपदेशदीनत्वात्प्रारब्धक्षये स्वयमेव ब्रह्मैक्यत्वाज्जनोद्धारकृतत्वाद्योगी श्रेष्ठः। गाणेशयोगी तु श्रेष्ठतमः, पूर्वोक्तब्रह्मचेष्टापरत्वाज्जनोद्धारकत्वाच्च। न चैवं शिव-विष्ण्वादिध्यानयुक्तोऽपि योगिनां वरः, तत्तद्भक्तिपरायणत्वादिति वाच्यम्। तेषामथर्वशिरःसु तत्त्वमस्यादिमहावाक्यात्मकशरीराभावाद्योगिपदाभावाच्च। तत्र परमहंसा योगिनो गाणेशा भवन्ति, योगिपदस्य परमहंसपरत्वात् एकगणेशाथर्वशीर्षप्रतिपादनत्वात् अन्यदेवाधिकारशून्यत्वाच्च। दण्डहीनाः परमहंसा ब्रह्मभूतास्तद्वन्दनं ब्रह्मशब्दाभिधम्, नारायणात्मकभावात्। " दण्डग्रहणमात्रेण नरो नारायणो भवेत् " इति स्मृतेः। गाणेशयोगिवन्दनं गणेशशब्दाभिधं च, परमहंसानां वरत्वात् ॥ इति ध्यानात्मको नवमः खण्डः ॥ ९ ॥

एवं ध्यानं प्रतिपाद्य स्तुत्यर्थमाह—

† पातञ्जलयोगसूत्रेषु प्रथमपादस्य प्रथमसूत्रभाष्ये द्रष्टव्यमेतत्।

१ क०रतत्वाच्च. २ ग० त्तं प्रवेश्य कायिक०. ३ ग० घ० ङ० वंदनं ब्रह्म० वंदनब्रह्म०.

Digitized by Google

**नमो व्रातपतये नमो गणपतये नमः प्रथमप-
तये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ना-
शिने शिवसुताय वरदमूर्तये नमः ॥ १० ॥**

नमः इति । व्रातपतये देवादिव्रातानां जीवानां पतित्वात्ते तुभ्यं नमः । गण-
पतये ब्रह्म-विष्णु-महेशादिगणानां पतित्वात् ईश्वरत्वात् ते नमः । "ब्रह्मविष्ण्वा-
दिगणानामीशभूतमित्याह । तद्गणेश इति । तत्परमित्याह । यमेतेनाप्नुवन्तीति "
इति श्रुतेः । प्रथमपतये[1] वर्णानां ब्राह्मणः प्रथमो मुख्यस्त्रिवर्णगुरुत्वात् । ब्राह्म-
णेषु योगी प्रथमो, महावाक्यानुभवयुक्तत्वात् । एवं जनानामीश्वराणां ब्राह्मणा-
नांच प्रथमाः श्रेष्ठास्तेषां पतिस्तदादिपूज्यतत्पूज्यत्वात्ते नमः । लम्बोदराय ते
नमोऽस्तु । एकदन्ताय नमः । विघ्ननाशिने कालात्मकभयहारिणे नमः, अमृता
त्मकपदप्रदत्वात् । तदेव कथ्यते । अभिनन्दनराज्ञेन्द्रभागहीनयज्ञारम्भः कृतः ।
तज्ज्ञात्वा कुपितेनेन्द्रेण कालमावाह्य तद्यज्ञभङ्गायाऽज्ञापितः । स कालपुरुषस्तद्धर्म
ज्ञात्वा विघ्नासुरो बभूव । जन्ममृत्युमयं जगत्कालाधीनं, त्रिलोकभ्रमणत्वात् ।
ब्रह्मानुभवयुक्तजनैः कालं जित्वाऽमृतमयो भवति तज्ज्ञानकारणं सत्कर्मसाधनेना-
न्तःकरणशुद्धिस्ततो ब्रह्मानुभवपात्रत्वात्तद्धर्मं ज्ञात्वा सत्कर्मनाशनार्थं विघ्नो ब-
भूव । सत्कर्महीनं जगत् कालाधीनं सदा मलिनान्तःकरणयुक्तत्वात् । ततोऽभिन
न्दनं हत्वा यत्र तत्र दृश्यादृश्यस्वरूपधृक्कालः सत्कर्मखण्डनं चकार । कालाज्ञान-
भावात्ततो भ्रान्ता वसिष्ठादयो ब्रह्माणं शरणं ययुः । तेनाज्ञप्ताः पार्श्वपुत्रं गणेशं
तुष्टुवुः, गणेशान्यदेवस्य कालनाशसामर्थ्याभावात् । ततो गणेशेन विघ्नासुरः प-
राजितः । स शरणं ययौ । तदा स्वाज्ञावशवर्तिनं विघ्नं चकार । विघ्नेन प्रार्थि-
तो विघ्नराजाख्यो बभूव । तदादि[2] गणेशादिपूजनहीनं तत्स्मरणहीनं यत्सत्कर्म
तत्र विघ्नप्रादुर्भावः । एवं नियमं कृत्वा तं स्वसमीपे स्थापयामास । एवं स्कान्दे वि-
नायकमाहात्म्ये मौद्गले च प्रतिपादितत्वात् । वेदादिषु विघ्नो भगवानिति कथ्यते,

---

* अत्र 'प्रमथपतये' इति इदानीन्तनानां सर्वेषां वैदिकानां पाठः । अयमपि साधीयानेव । प्रमथ्नाती-
ति प्रमथः । शम्भोः पारिषदाः प्रमथसंज्ञकाः । तदुक्तं कालिकापुराणे एकोनत्रिंशाध्याये ।

ध्यानस्थं पर्यचर्यन्ति सलिलादिभिरीश्वरम् । नानाशस्त्रधराः शम्भोर्गणास्तु प्रमथाः स्मृताः ॥
प्रमथ्नन्ति च युद्धेषु युद्ध्यमानान्महाबलान् । ते वै महाबलाः शूराः संख्याता वसुकोटयः ॥१॥ इति
शिवसुतत्वात् प्रमथसंज्ञकानां शिव गणानां पतिः इति यथासम्भवं योजनीयम् ।

१ ग० घ० ङ० ब्रह्मणां च. २ क० ख० ग० घ० ङ० जनो कालमितिपाठः.

३ क० ख० ग० घ० ङ० तदादिमारभ्य गणेशादि.

Digitized by Google

कालमयत्वात् कालाधीनसृष्टि-स्थिति-लयत्वाच्च । ब्रह्म-विष्णु-महेशा वयं ब्रह्माण इति मदयुक्ताः सन्तो वेदमार्गं त्यक्त्वा स्वेच्छाविहारिणो यदा भवन्ति, तदा सविघ्नाः असुरैः पराजिताः स्वेच्छाविहारभङ्गा भवन्ति । पुनर्ब्रह्माभिमानं त्यक्त्वा गणेश एक एव स्वेच्छाचारी ब्रह्मशरीरत्वात्, एवं ज्ञात्वा शरणं गच्छन्ति तदा स्वस्वसामर्थ्ययुक्ता असुरान्विजित्य स्वपदस्था ईश्वरा भवन्ति, विघ्नाधीनत्वात् । विशेषेण जगत्सामर्थ्यं हन्तीति विघ्न इति व्युत्पत्तिबलाद्विघ्नसमं न किंचिदिति संक्षेपार्थः । तद्यथा । " भगवन्तौ विघ्नविनायकौ प्रीयेताम् " इति पुण्याहवाचनवचनत्वात् । स्कान्दे ।

" उक्त्वैवमाह्वयत्स्कन्दः शक्रस्तं कालरूपिणम् ।
य इदं मायया मोह्य कलयत्यखिलं जगत् "॥ इति ॥
विघ्नरूपेण घोरेण स कालपुरुषो भुवि ।
गर्जनादखिलांल्लोकान्कम्पयामास वेगवान् "॥

इति ॥ योगवासिष्ठे भृगुं प्रति कालवाक्यम् । तद्यथा ।

" मा तपः क्षपयाऽबुद्धे कल्पकालमहानलैः ।
यो न दग्धोऽस्मि मे तस्य किं त्वं शापेन धक्ष्यसि ॥
ब्रह्माण्डावलयो ग्रस्ता निगीर्णा रुद्रकोटयः ।
भुक्तानि विष्णुवृन्दानि क्व न शक्ता वयं मुने "॥

इति स्मृतिभिः । विघ्नं महाकालं हरति तस्मै नमः । " अथ ह आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधारण एषां लोकानामसम्भेदाय " इति श्रुतेः । लोकानामसम्भेदाय विघ्नभयस्वमर्यादायुक्तलोकत्वात् । शिवसुताय । तद्यथा । गणेशेन सृष्टाः शिवादयस्तपश्चक्रुः । तत्रादौ शिवहृदि ब्रह्मानुभवो बभूव, समाधिक्रियाधिक्यात्। ततो हृदि गणेशं ददर्श संस्तुत्य प्रार्थनां चकार।'त्वं मे पुत्रो भव'त्वत्पितृतारकत्वात् । 'तदहं माया-मोह-भयहीनश्चरामि' गणेशजनकत्वादिति । तदेव विनायकसंहितायां मयूरेशक्षेत्रमाहात्म्ये ।

" ध्याने मनसि मे जातः पुत्रत्वं पालय प्रभो ।
मम पुत्र इति ख्यातो लोकेऽस्मिन्भगवन्भव "॥

इत्यादिस्मृतिभ्यः । त्रिगुणावतारैर्ब्रह्म-विष्णु-शिवाख्यैरवध्यासुरनाशनार्थं कलांशगणेशावतरणं सर्वत्र प्रसिद्धम् । तदवतारचरित्रज्ञापनार्थत्वादत्र शिवसुत इति कथितः, वेदप्रामाण्येषु पुराणेषु नानावतारप्रतिपादनात् । न

१ ग० ते विघ्नासुरैः.

Digitized by Google

चैवम् तपः प्रार्थितगणेशः शिवसुतः, तत्र शिवः श्रेष्ठो गणेशजनकत्वादिति वाच्यम् । एवं शिव-विष्ण्वाद्यवतारचरित्रत्वादनादिसम्प्रदायत्वाच्च । विष्ण्वथर्वशीर्षे " ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः " इति श्रुतेः । देवकीपुत्रत्वेन विष्णोर्न कनिष्ठत्वापत्तिः, भक्तवाञ्छितकृतत्वाद्भक्ताधीनदेवेशत्वाच्च । ते नमः वरदमूर्तये, सर्वेश्वरजनवरदत्वात् प्रत्यक्षं वरदमूर्तिः स्ववरदाभावाच्च । न चैवं शिव-विष्ण्वादयो वरदमूर्तयः, स्वस्वभक्तवरदत्वादिति वाच्यम् । शिव-विष्ण्वादिवरदगणेशत्वाद्गणेशवरदाभावात् । ननु शिवपुराणे गणेशवरदःशिवः कथितः, 'सर्वादिपूज्यो भव' इति वचनादिति चेन्न । शिवपुत्रभावरक्षणार्थत्वात्, पितृदत्ताधिकारपरायणपुत्रत्वात् दशरथदत्तयुवराजाधिकारयुक्तरामचन्द्रवत्पुरातनसंप्रदायत्वात् ते नमः । 'व्रातपतय'इत्यारभ्य'वरदमूर्तये नम' इतिपर्यन्तमष्टनामनमनम्, तदन्तर्गतसर्वनामत्वात् । नाममन्त्रतत्त्वमस्यात्मकसत्यवादिभक्तरक्षणात्मकोङ्कारात्मकैकाक्षरविद्यामायत्रीध्यानस्तुतिप्रतिपादकमष्टमार्गप्रकाशकत्वादष्टाङ्गमिति ॥ इतिस्तुतिप्रतिपादको दशमः खण्डः ॥ १० ॥

इति अथर्वणऋषिप्रोक्तं गणेशाथर्वशीर्षं समाप्तम् ।

॥ अथ फलश्रुतिः ॥

एवं स्तुतिं प्रतिपाद्य गणेशाथर्वशीर्षफलश्रुतिं प्रतिपादयन् ग्रन्थमाह । तत्रादौ गणेशाथर्वशीर्षाध्ययनफलप्रतिपादनार्थमाह.—

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते । स सर्वतः[1] सुखमेधते । स पञ्चमहापापात्प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायम्प्रातःप्रयुञ्जानो अपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्ममर्थं कामं मोक्षं च विन्दति[2] । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्दास्यति स पापीयान्भवति । सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत्[3] ॥ ११ ॥

१ सर्वतः इति लोके पाठः. २ धर्मार्थकामःमोक्षं च इति-लोके पाठः. ३ साधयति-इति लोके पाठः.

Digitized by Google

एतदिति । एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते, देहभृदपि ब्रह्मैवा-तत्त्वमस्यात्मकगणेशार्धीनसामर्थ्यात्तद्विश्वासयुक्तत्वात्।अन्यद्योऽनुभवकृत्सोऽ-प्यधीत इति कथ्यते। स देहभृद्ब्रह्मैव, योगित्वाच्च । स सर्वविघ्नैर्न बाध्यते। धर्मा-र्थकाम-मोक्षसाधनान्तरायात्मकविघ्नैर्न बाध्यते, साधनशीलाधीनत्वात् । स सर्वत्र सुखमेधते, नानालोकस्थाधीनत्वान्नानाकार्यसुखयुक्तत्वाच्च । स पञ्चमहापापात्प्रमु-च्यते। पापं पञ्चविधम् । हिंसा-ऽभक्ष्यभक्षण-परस्त्रीगमन-स्तेय-तत्संसर्गात्मकत्वा-त्। तत्र पञ्चमहापापादिति जातित्वादेकवचनम् ।ब्रह्महत्या-सुरापान-गुरुतल्पगम-न-सुवर्णस्तेय-तत्संसर्गयुक्तत्वात् । आदावेव सायमधीयान इति, गुरुमुखोद्गतं स्व-कण्ठगं कृत्वाऽध्ययनकाल आदौ सायंकालप्राप्तत्वात् । तद्वत्प्रातरेव। सायंप्रातर-धीयानः सर्वदिवस-रात्रिपापवर्जितत्वादपापो भवतीति। सर्वत्राऽधीयानोऽपविघ्नो भवति। नानाकार्यकृत्तत्तत्कार्याद्यधीतत्वात्। धर्ममर्थं कामं मोक्षं च विन्दतीति।इह-लोकमनादृत्य परलोकार्थसत्कर्मपरायणत्वात् धर्मार्थी। इहलोकश्रेष्ठार्थसत्कर्मपरा-यणत्वात् अर्थार्थी।इहलोक-परलोकोद्भवभोगार्थसत्कर्मपरायणत्वात् कामार्थी।इह-लोक-परलोक विरागयुक्तात्मप्राप्त्यर्थसत्कर्मपरायणत्वात्मोक्षार्थी च।एकैकपुरुषा-र्थी चतुःपुरुषार्थी वा य इदमधीते स तत्तल्लभते, गणेशस्य इच्छापूरकत्वात्। अशि-ष्याय यथार्थाथर्वशीर्षशिक्षाहीनाय न देयमिदं, ऋत-सत्यवादिरक्षकगणेशत्वात् । यो यदि मोहाद्दास्यति। द्रव्यलोभाच्छुश्रूषालोभाद्विद्याविनिमयलोभादित्यादिना नामोहादिति सोऽतिपापी, यथार्थोऽथर्वशीर्षश्रुश्रूषणाद्गुरुभावगणेशपीडितत्वात्। अस्य सहस्रावर्तनाद्यं यं काममिच्छति तं तं प्राप्नुयात्। वीप्सायां अदरार्थत्वात् ॥

॥ इत्यध्ययनफलश्रुत्यात्मक एकादशः खण्डः ॥ ११ ॥ ॥ ॥ ॥

एवं अध्ययनफलश्रुतिं प्रतिपाद्य नानाप्रयोगार्थमाह—

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति। चतुर्थ्यामनश्नञ्जपति स विद्यावान्भवति। इत्यथर्वणवाक्यम्। ब्रह्माद्यावरणं विद्यान्न बिभेति-कदाचनेति ॥ १२ ॥

अनेनेति । प्रशस्तवागर्थ्यभिषेकं कुर्यादिति । चतुर्थ्यामनश्नञ्जपति यः स विद्यावान्भवति, प्रातरारभ्य सायं पर्यन्तं जपानुष्ठानपरत्वात् । इत्यथर्वण-वचनत्वाद्यथार्थफलप्राप्तिरिति । ब्रह्मादीनां मायावरणं विद्यात् अत एव न बिभेति, ज्ञातावरण-तन्मोहहीनत्वात् ॥ इति नानाप्रयोगफलश्रुत्यात्मको द्वादशः खण्डः ॥ १२ ॥

१घ० तत्त्वात्.

Digitized by Google

एवं भयहीनतां प्रतिपाद्य यजनार्थमाह—

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान्भवति स मेधावान्भवति । यो मोदकसहस्रेण यजति । स वाञ्छितमवाप्नोति । यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ १३ ॥

य इति । दूर्वाङ्कुरैर्यजति स कुबेरसमो भवति, कनकप्रियत्वात् । लाजैर्होमो यशःप्रदो मेधाप्रदश्च, तत्तत्प्रयोगप्रमाणत्वात् । यो मोदकसहस्रेण यजति, प्रतिखण्डं जुहुयात्प्रत्यर्चंवत्प्रमाणत्वात्, स वाञ्छितफलमवाप्नोति, नानाकार्यसिद्धिप्रदत्वात् । यः साज्यसमिद्भिर्यजति मन्त्रशास्त्रोक्तनानाकार्यप्रदनानासमिद्धोमप्रमाणत्वात्, स सर्वं लभते स सर्वं लभते । अत्र वीप्साऽऽदरप्रदर्शिनी । नानासमिद्धोमप्रियत्वात् । अत्र कुण्ड-वेदि-देवतास्थापनादिकं वैदिकतान्त्रिकमार्गोक्तवद्ग्राह्यम् । आहुतिगणनानियमः सर्वसाधारणत्वात् । अत्र जपानुष्ठानं मुख्यम् । यं यं काममधीते तं तमनेन साधयेत्, एकानुष्ठानस्य सर्वकार्यप्रदत्वाद्वीप्साया आदरार्थत्वाच्च । न चैवं मोदकसहस्रहोम-साज्यसमिद्धोमौ मुख्यौ, वाञ्छितप्रद ' सर्वं लभत ' इति वीप्साऽऽदरप्रमाणत्वादिति वाच्यम् । मोदकहोमस्य वीप्साहीनत्वात् । साज्यसमिद्धोमः वीप्साऽऽदरयुक्तोऽपि नानाकार्यप्रदनानासमिद्धोमानुष्ठानपरत्वात् । अत्र सहस्राऽवर्तनात्मकं पुरश्चरणम् । सहस्राऽवर्तनाद्यं यं काममधीत इति मोदकसहस्रेण यजतीति प्रमाणात् ॥ इति होमात्मकत्रयोदशः खण्डः ॥ १३ ॥

अथान्यप्रयोगार्थमाह—

अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महाप्रत्यवायात्प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति य एवं वेद[2] ॥ १४ ॥ इत्यथर्वणवेदोपनिषत्सु गणेशाथर्वशीर्षं समाप्तम् ॥

१ ग० ङ०वाञ्छितफलमवा०. ख० घ० वाञ्छिततमभवा०. २ इत्युपनिषत् इति लोकपाठेऽधिकम्.

Digitized by Google

अष्टाविति । सम्यक् ग्राहयित्वा, यथार्थाथर्वशीर्षगणेशैकतत्परकारयितृत्वात् । सूर्यवर्चस्वी भवति, सूर्यवत्सर्वज्ञानप्रकाशयुक्तत्वात् गणेशज्ञानान्तर्गतनानावेदान्तप्रतिपाद्यज्ञानत्वाच्च । सूर्यग्रहे महानद्यां ब्रह्मकमण्डलु-भागीरथी-यमुना-सरस्वती-नर्मदादीनां कस्याश्चिन्नद्यास्तीरे महदघनाशकत्वादनन्तगुणाधिकसत्कर्मफलप्राप्तिकारकत्वात् । प्रतिमासन्निधौ मयूरेश्वरादिमहाक्षेत्रस्थगणेशप्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । मन्त्रोक्तसिद्धिसामर्थ्ययुक्तत्वात् । अथर्वशीर्षात्मकमन्त्रजपो मालामन्त्रप्रामाण्यत्वात् तज्जप्त्वाऽथर्वशीर्षोक्तज्ञानवानेकाक्षरविद्यासिद्धसामर्थ्यवान्भवतीति । महाविघ्नात्कालभयात्प्रमुच्यते, अथर्वशीर्षोपासनाया अमृतमयत्वात् । महादोषान्मायाविकारात्मकदोषात्, मायाविकारपरदोषाभावात् । महाप्रत्यवायाज्जीवन्मुक्तविषयासक्तयुक्तप्रत्यवायात्, योगस्थित्यभावात् । स सर्वविद्भवति, गणेशज्ञानान्तर्गतसर्वज्ञानत्वात् । "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं[1] सर्वं विदितं भवति" इति श्रुतेः । अथर्वशीर्षसमाप्तिज्ञापनार्थं वीप्सा वेदसम्प्रदायत्वात् । य एवं वेद पूर्वोक्तयथार्थज्ञानयुक्तत्वात् ॥ इत्यथर्वणवेदोपनिषत्सु अन्यप्रयोगात्मकश्चतुर्दशः खण्डः ॥ १४ ॥

॥ इति गणेशाथर्वशीर्षभाष्यं समाप्तम् ॥

---

१ ख० ग० घ० ङ० गाणेश०. २ ग० घ० ङ० गाणेश०.

॥ श्रीगजाननार्पणमस्तु ॥

Digitized by Google

॥ अथ ॥

सभाष्यगणेशाथर्वशीर्षशुद्धिपत्रकम् ।

पृष्ठम् ।	पङ्क्तिः ।	अशुद्धम् ।	शुद्धम् ।
१	२१	चतुर्ष्वप्पादर्श	चतुर्ष्वप्यादर्श
२	१२	पदातदङ्ग	पदानां तदङ्ग
३	२७	विधात	विघात
३	२८	विधात	विघात
४	२४	सुष्टक्तं	सुष्टूक्तम्
४	२७	नेदिष्टं	निर्दिष्टम्
४	२९	मतो ओङ्कार	मत ओङ्कार
६	४	स्तंस्थितः	संस्थितः
६	२५	स्नैन्धव	सैन्धव
६	२९	ज्ञावमि	ज्ञानमि
७	८	ऋक् ऋचः	ऋक् रसः ऋचः
७	१०	विमृष्ठं	विमृष्टम्
७	१२	त्येदस्मी	त्येतदस्मि
८	४	ऐतदात्म	एतदात्म
८	१७	आप उप	अबुप
१०	२१	मनाहत्य	मनादृत्य
१२	२०	नस्वाग्रे	नखाग्रे
१७	१६	त्मतकत्वात्	त्मकत्वात्
१८	२८	दृश्यतेति	दृश्यत इति
२२	१३	त्वाचित्त	त्वाच्चित्त
२५	२	तपः प्रार्थि	तपःप्रार्थि
२५	१३	त्मकोङ्कोरा	त्मकोङ्कारा
२६	१६	चतुःपुरुषार्थी	चतुष्पुरुषार्थी
२६	२०	अदरार्थत्वात्	आदरार्थत्वात्
२६	२३	वाग्मी	वाग्ग्मी
२८	५	महदघ	महाघ

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google